हूण-पराजयम्

ऐतिहासिकं नाटकम्



प्रणेता

डा० शिवप्रसादो भारद्वाजः

अनुज डा. शत्रुघ्न शर्मा को
सप्रेम उपहार
शिवप्रसाद
५.७.७८

हूण-पराजयम्

ऐतिहासिकं नाटकम्

प्रणेता

डा० शिवप्रसादो भारद्वाजः

शास्त्री, एम० ए०, एम० ओ० एल्०, पी०-एच्० डी०,
साहित्याचार्यः, साहित्यरत्नम्

प्राध्यापकः

पञ्जाब विश्वविद्यालयीय विश्वेश्वरानन्द विश्वबन्धु
भारत-भारती-संस्थानम्, होशियारपुर

प्रकाशक—डा० शिवप्रसाद भारद्वाज

प्रथम संस्करण—१९७७ नवम्बर

मूल्य—छः रुपये

सर्वाधिकार सुरक्षित

मुद्रक

वी. वी. आर. आई. प्रैस, साधु आश्रम, होशियारपुर

कृतज्ञता-प्रकाशनम्

यामधीत्य मनुष्यत्वं शिक्षितं, संस्कृतिर्निजा ।
ज्ञाता, वार्ता च लब्धा सा जयेद् भारत-भारती ॥

प्रस्तुतं हूण-पराजयं नाम नाटकं प्रणेतुः 'अजेय-भारतम्', 'साक्षात्कारः' केसरिचङ्क्रमणम् इति लघुरूपकाणां परम्परायां नूतनो यत्नः । इतः पूर्वं प्रतीकात्मकं 'सङ्गच्छध्वं संवदध्वम्' इति शीर्षकेणैव आत्मनो भाव-सम्पदं द्योतयद् अन्यन् नाटकं रचितमासीत् । प्रायेण नवीन-पद्धत्या गीतानि आकलयत् तदद्याऽपि प्रकाशनं प्रतीक्षते ।

वर्तमानं नाटकं शैल्या भावयोजनया च ततः सर्वथा भिन्नं संविधानेन पुरातनै र्नाटकैरंशत एव संवदति । अद्यत्वे लोके सर्वतः 'संस्कृतं नितरां क्लिष्टं तज्ज्ञैः सुबोधं करणीयम्' इत्येव घोषः श्रूयते । तस्याः क्लिष्टतायां मुख्यतः समास-बाहुल्यं सन्धयश्च सर्वत्र विहिता हेतुत्वेन निर्दिश्यन्ते । अतः सावधानम् अत्र पद्यबन्धे तेषां निराकृतिर्न संभवतीति गृहीतान्येव । गद्येऽपि सरलाः सन्धयो यैर्नार्थबोधे बाधो भवति, यथास्थलं स्वीकृताः । एतेन नाटकमिदं सामाजिकानां न तथा दुर्बोधं भविष्यतीत्याशास्यते ।

नाट्य-शास्त्रीय-परम्परया नाटके न्यूनतमाः पञ्च अङ्का अपेक्ष्यन्ते न च तेषां दृश्येषु विभाजनं भवति । परम् अत्र वामनस्य पदत्रयीव अङ्कत्रयी विहिता प्रत्येकस्मिन् चाऽङ्के दृश्यत्रयम् इति नूतन एव पन्था ऊरीकृतः । नाऽप्यत्र प्राचीननाटकेष्विव श्लोकानां बाहुल्यम् । यत्रतत्र गीतान्यपि निहितानि । नान्दी प्रस्तावना चोभे अपि स्वीकृत्य कथञ्चन नाट्यशास्त्रीय-नियमोऽपि निर्व्यूढः ।

नाटकस्याऽभिनेयत्वसम्पादने रसपरिपाके च विशेषेण यत्नः कृतः । अतः सत्यवसरे प्रयुक्तं सद् इदं रूपकं जनहृदयान्यावर्जयिष्यतीत्याशासे ।

अद्यत्वे प्रकाशन-सामग्र्या महार्घतया न प्रकाशकाः सहसा नव पुस्तक-प्रकाशनायोत्सहन्ते । काव्यनाटकादीनां तु विक्रयेण न भूरिफलागमाशा, अतस्तेषां विषये तु सविशेषमुदासते । अतः पूर्वोद्दिष्टलघु-रूपकाणीवेदम् अपि विश्वेश्वरानन्द-विश्वबन्धु-शोध-वैदिक-संस्थानेन प्रकाश्यमाने 'विश्व-संस्कृतम्

इत्याख्ये त्रैमासिके संस्कृत-पत्रे क्रमशः प्रकाशम् अगात् । एतदर्थं तस्य संस्थानस्य वर्तमानः सञ्चालकः श्री शि० भास्करन् नायर महोदयः तदीयः सह-सम्पादक उनियालोपाह्व इन्द्रदत्तमहाभागश्चेत्युभावपि भूरिशो धन्यवादानर्हतः । अन्येऽपि सुहृदः प्रेरणया, प्रोत्साहनेन, परामर्शदानेन वाऽत्र कर्मणि साहाय्यमाचरितवन्तो धन्यवादानां पात्राणि । अन्ते च —

यस्याः पूत-रजःकणेषु लुठितो बाल्ये, गतो यौवनम् ,
यस्या वा पयसा, सुधा-सुमधुरेणान्नेन चाऽऽप्यायितः ।
यस्या अङ्कतलेऽथ नन्दन समे स्थित्वा सुखं प्राण्यते
तस्या भारत-मातुरङ्घ्रि-युगलेऽयं नाट्य-पुष्पाञ्जलिः ॥

समपर्कः
रचयिता

अभिप्रायः

अद्यत्वे संस्कृतभाषायाः पठन-पाठनं प्रति जनानाम् अभिरुचिः प्रतिदिनं क्षीयमाणैव लक्ष्यते। केचन मृतभाषाम्, अपरे ब्राह्मणानां जीविका-साधनम्, इतरे च पुरातनीं सम्प्रति च परिवर्तमाने जीवनेऽकिञ्चित्करीं तां वदन्तः तिरस्कुर्वन्ति, तथापि वर्तत एव समाज एको वर्गो यो नाम अस्याः श्रवण-मात्रेण पुलकितो भवति, अस्या एवार्थे प्राणिति अभिवृद्धिं चाऽयाः कामयते। एतादृशैर् भारत-भारती-सेवकैर् अनुदिनं नूतनसाहित्यस्य रचनाऽपि सर्वविधा क्रियते। तस्याम् एव दिशि लघीयान् अयं यत्नः।

अद्य समाजे स्वैराचारिता वर्धमाना लक्ष्यते। जीवने नाऽस्ति अनुशासनं सामाजिकं धार्मिकं वा, राजनैतिकं तत् तु स्वल्पस्थायि भवति। अतः मानस-परिवर्तनेन संशुद्धिं गतं जीवनं न जातु विक्रियाम् एति। साहित्येन च एतत् संभवति। नाटकं च वाङ्मये विशेषेण प्रभविष्णु। तच्च सरलम् अभिनेयं नवां पद्धतिं चानुसरत् स्याच् चेद् उपयुक्ततरं स्यात्।

अत इदं संक्षिप्तं नाटकं वीररसात्मकं मालवेश्वरस्य यशोधर्मणो हूण-विजयात्मकम् ऐतिहासिकं घटना-क्रमम् अधिकृत्य रचितं वर्तते।

धन्वन्तरिक्षपणकामरसिंहशङ्कुवेतालभट्टघटकर्परकालिदासाः।
ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचिर्नव विक्रमस्य॥

इति श्लोकेन तस्य राज्ञः संस्कृतभक्तिर्लोकप्रसिद्धा एव। अत एव नाटकेऽत्र देशभक्तेर्भावना संस्कृतभाषां प्रति अनुरागश्चेति उभयं मिश्रितम्। श्लोकानां न्यूनतमः प्रयोगः यत्र तत्र गीतानां संनिवेशश्च रोचकम् इदं विधास्यतीति मन्ये। आशासे, विदुषां रसिकानाञ्च हृदयानि आवर्ज-यिष्यतीति।

नाटकस्य कथानकं नाट्यशास्त्रानुसारेण इतिहासानुमतम् अपि यथोचितं कल्पनया उन्मिश्रम् एव भवति। नाटकं हि काव्यं न तु इतिहासः, इतिहासस्य क्षेत्रम् अन्यत् काव्यस्य चान्यत्। अतः तत्र यथावश्यकम् एव इतिहासस्योपयोगः क्रियते। रसप्रबन्धयोर् औचित्यम् अपेक्ष्य कविः कथा-वस्तु निबध्नाति। अतोऽत्र यदि कियानपि कथाभाग इतिहाससमर्थितः

न स्यात् तर्हि समीक्षकैः कोपकषायितानर्नैन भवितव्यम् । यशोधर्मणा मालवेश्वरेण मगधेश्वरस्य बालादित्यविरुदभाजो नरसिंहगुप्तस्य स हाय्येन हूणाः पराजिता भारतान् निष्काषिताश्चेति ऐतिहासिका वदन्ति । तोरमाणः मिहिरकुलश्च भारते काश्मीरान् मध्यप्रदेशं चाशास्ताम् इति कल्हणस्य राजतरङ्गिण्या अन्यस्रोतोभिश्च ज्ञायते । उज्जयिन्या अधीश्वरेण विक्रमादित्येन मातृगुप्तः काश्मीराणां शासको नियुक्त आसीद् इति च राजतरङ्गिण्या अवसीयते । धन्वन्तरिप्रभृतीनां विक्रमादित्यसभास्तारत्वं तु लोकश्रुतिप्रसिद्धम् । अतोऽमूनि पात्राणि ऐतिहासिकानि लोकविश्रुतानि च । शङ्कु-वररुचिसदृशकवीनां कृतित्वेन दर्शिताः श्लोका अपि कृष्णमाचारियर-महाशयकृतसंस्कृतसाहित्येतिहासे तत्तत्कविकृतत्वेन निर्दिष्टाः ।

अस्य रचना पञ्चनदीयसंस्कृतपरिषदो वार्षिकाधिवेशने प्रयोगार्थं कृताऽऽसीदिति तस्याऽभिनेयता विशेषेण दृष्टौ निहिता । अतः प्राचीनकविकृतनाटकेष्विव नाऽस्त्यत्र श्लोक-बाहुल्यम् । अद्यत्वे गीतानि विशेषेण जनेभ्यो रोचन्त इति यत्र तत्र तानि निहितानि । न च किमपि दृश्यम् अनभिनेयम् । त्रिविक्रमस्य पादत्रयम् इव अङ्कत्रयम् एव अत्र न्यस्तम् इति नाट्यशास्त्रनियमम् अतिवर्तते ।

सत्स्वपि एतेषु विशेषेषु नाऽयं लेखकस्याऽभिप्रायः यद् इदं नाटकं प्राचीनकविकृतनाटकानां समताम् अर्हति । महाकविप्रतिभायाः शतांशोऽपि नाऽस्मद्विधेषु वर्तत इति का कथा तैः सह प्रतिस्पर्धायाः । परं तस्यां दिशि यथामति किमपि चापलं क्रियते सुरभारतीभाण्डागारसमृद्धिहेतवे । यदि केचिद् गुण-परमाणवः सुधीभिरत्र लभ्यन्ते तदानुषङ्गिकम् । अतः साधारणीमपि कृतिं विदुषां पुरस्तादुपन्यस्यन् विरमामि ।

पुरुष-पात्राणि

१.	यशोधर्मा	मालवेश्वरः नायकः
२.	वेतालभट्टः	मालवेशस्य प्रधानमन्त्री
३.	नरसिंहगुप्तः	
	बालादित्यः	मगधेश्वरः, मालवेशस्य सहायकः
४.	तोरमाणः	हूण-नरेशः
५.	सिंहभद्रः	मालवनरेशस्य सेनापतिः
६.	मिहिरकुलः	तोरमाणस्य पुत्रः काश्मीरराजः
७.	नागसेनः	उत्तरदुर्गपाल-सहकारी
८.	मातृगुप्तः	कालिदासोपाधिधारी मालवेशसभायाः कविः पश्चात् काश्मीरनरेशः
९.	अमात्यः	मगधेश्वरस्य मन्त्री
१०.	रोमकः	तोरमाणस्य मन्त्री
११.	करालः	मिहिरकुलस्य मन्त्री
१२.	मन्त्री	मालवेशस्य अन्यः मन्त्री
१३.	विडालाक्षः	तोरमाणस्य सेनापतिः
१४.	जालुकः	मगधेश्वरस्य राजपुरुषः
१५.	वराहमिहिरः	ज्योतिर्विद् मालवेश-सभारत्नम्
१६.	धन्वन्तरिः	राजवैद्यः
१७.	क्षपणकः	काश्मीरकः कविः मालवेश-सभारत्नम्
१८.	शङ्कुः	कविः ,,
१९.	घटकर्परः	कविः ,,
२०.	वररुचिः	कविः ,,
२१.	सञ्जीवकः	वेतालभट्टस्य निजः सेवकः
२२.	सूचकः	मालवेशस्य गुप्तचरः

प्रधानमन्त्रिपुत्रः, प्रतीहारः, दौवारिकः, सन्देशहरः, चर्पटकचिविल्लकादीनि सामान्यपात्राणि ।

स्त्री-पात्राणि

२३.	माता	वेतालभट्ट-पत्नी
२४.	बारवनिता	मिहिरकुलस्य प्रेयसी

हूण-पराजयम्

प्रथमोऽङ्कः

प्रथमं दृश्यम्

(पूर्वरङ्गः)

(सर्वेऽभिनेतारः अभिनेत्र्यश्च संभूय नान्दीं कुर्वन्ति ।)

जय हे ! जय जय भारत हे !
गङ्गा-यमुना-सलिल-सुधाकण-
पूत-पवन-पुलकित-तनु-धारण !
खलरिपुवारणकुम्भविदारणमृगपतिधारित हे !
जय जय भारत हे !
सप्तसिन्धु-लहरी-सरसान्तर,
कुलगिरीन्द्रगरिमोर्जितप्रान्तर,
बहुविभूतिसंभृतदेशान्तर, प्रकृति-सुलालित हे !
जय जय भारत हे !
राम-कृष्ण-गौतम-जनि-दातर्,
महावीर-गांधि-व्रत-रातर्
पञ्चशील-मधुरध्वनि-गातर्
शान्तिसुधा-रत हे !
जय जय भारत हे !
दृष्ट-भीष्म-कर्णार्जुन-भुजबल,
चन्द्रगुप्त-विक्रम-लीलास्थल,
सत्-प्रताप-शिव-चम्पति-सुत-चल-
खड्ग-सुलालित हे !
जय जय भारत १ ! जय जय भारत हे २ ! जय जय भारत हे ३!

(नान्द्यन्ते प्रविश्य)

सूत्रधारः—अलं भो अतिपल्लवितेन। (परिक्रम्य रङ्गशालायां समवेतान् सामाजिकान् अवलोक्य) अहो, भारतस्य स्वातन्त्र्य-समारोहे निमग्नानां यूनाम् अमन्द आमोदः यत् ते दिवसं विविधैः कार्यक्रमैर् अतिवाह्य इदानीं रङ्गशालायाम् अभिनय-दर्शनाय स्थिताः। सर्वे च एते सुशिक्षिताः कलाप्रियाश्च। तद् एतेषां मनोरञ्जनाय किमपि सुरुचिकरं नाटकं प्रस्तोतव्यम्। (नेपथ्याऽभिमुखम् अवलोक्य) मारिष ! इतस्तावत्।

पारिपार्श्विकः—(प्रविश्य) भाव ! आदिश्यतां करणीयम् ।

सूत्रधारः—तिष्ठतु तावद् आदेशः । ननु पश्यसि एतान् कौतुकिनः सामाजिकान् ।

पारिपार्श्विकः—सर्वेऽपि एते सुशिक्षिताः सुरभारत्यां कृतानुरागाः ।

सूत्रधारः—आम् । अमी किमपि अवसरोचितं नवं च संस्कृतनाटकं विदृक्षवः यस्मिन् देश-प्रेम संस्कृतभाषां प्रति चानुरागः इति उभयम् अपि व्यञ्जितं स्यात् ।

पारिपार्श्विकः—भाव, देश-प्रेम-कथा तु उचिता यतः स्वातन्त्र्योत्सवः प्रवर्तते । परं संस्कृतं प्रति अनुरागस्य कः अवसरः ?

सूत्रधारः—मारिष, भारतस्य गौरवम् अध्यात्मवादमूलम् । तस्य तत्त्वानि च संस्कृत एव निहितानि ।

पारिपार्श्विकः—परम इदं तु विज्ञानस्य युगम् । आंग्लभाषा विज्ञानशिक्षाया द्वारम् । तत्र संस्कृतस्य क उपयोगः ?

सूत्रधारः—मारिष, अस्ति महान् विज्ञानराशि संस्कृते । आधुनिकविज्ञानेन सह प्राक्तनविज्ञानस्य अध्ययनेन एव विज्ञान-शिक्षा पूर्णा भविष्यति ।

पारिपार्श्विकः—अस्तु । कस्य रूपकस्य प्रयोगम् इदानीम् अभिलषति भावः ?

सूत्रधारः—अस्ति शिवप्रसादभारद्वाजकृतं हूण-पराजयं नाम नाटकं यत्र हूणारेर्यशोधर्मणः विक्रमादित्यविरुदधारणं संस्कृतं प्रति अनुरागश्चेति उभयं वर्णितम् ।

पारिपा०—भाव, साहसाङ्कः विक्रमादित्यः संस्कृतभाषायाः संरक्षक आसीद् इति सर्वेऽपि जानन्ति । किं यशोधर्मा अपि संस्कृतस्य संरक्षक आसीत् ?

सूत्रधारः—अथ किम् ? तस्य सदसि नव रत्नानां स्थितिः केन न ज्ञायते ? किं न श्रुतः अयं श्लोकः—

धन्वन्तरिक्षपणकामरसिंहशङ्कुवेतालभट्टघटकर्परकालिदासाः ।
ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचिर्नव विक्रमस्य ।।

पारिपार्श्विकः—श्रुतः । परं मया ज्ञातम् अयं विक्रमादित्यः साहसाङ्क आसीत् । अधुना ज्ञातं यद् यशोधर्मणः सभायाम् अपि नवरत्नानि आसन् इति ।

सूत्रधारः—अस्य एव विक्रमादित्यस्य हूण-विजयम् अधिकृत्य लिखितं नाटकं प्रयोक्ष्यते । गच्छ, कुरु यथोचितं संविधानकम् ।

पारिपार्श्विकः—मारिष, एष करोमि ।

(निष्क्रान्तौ)

(इति प्रस्तावना)

प्रथमोऽङ्कः

प्रथमं दृश्यम्

(महाराजयशोधर्मणः सभाभवनम् । आस्थानोचिता सज्जा । उभयत आसनेषु सभासदः विद्वांसश्च तिष्ठन्ति । दक्षिणत एकः अमात्यः) ।

राजा—मन्त्रिन् !

मन्त्री—आज्ञापयतु देवः ।

राजा—अस्माकं राज्ये का स्थितिः कवीनां विदुषां च ?

मन्त्री—महाराज, राज्येऽस्मिन् संस्कृतभाषायाः प्राकृतस्य अपभ्रंशस्य च अनेके कवयः तिष्ठन्ति । तेषां योगक्षेम-चिन्ता शासनेनैव क्रियते ।

राजा—अथ विदुषाम् ?

मन्त्री—विदुषां सैव प्रतिष्ठा । अनेके ज्योतिर्विदः, वैयाकरणाः, आयुर्वेद-तत्त्वज्ञाः दार्शनिकाश्च काले काले राजसभायां स्ववैदुष्यं प्रकटयन्ति । देशस्य कोणे कोणे विद्यालया विद्यन्ते यत्र निश्शुल्कं विद्यार्थिनः अष्टादश अपि विद्या अध्याप्यन्ते ।

राजा—अयं महतो हर्षस्य विषयः यथा अत्र मातृगुप्तसदृशः कविः, वररुचि-सदृक्षः विद्वान्, अमरसिंहतुल्यः कोषकारः, शङ्कुसमः नाट्यशास्त्रा-चार्यः । एतादृशा अन्यत्र क्व भविष्यन्ति ?

मन्त्री—देव ! शरदि हंसा गङ्गातटम् इव बुधाः कविवराश्च भवन्तं स्वयं समागत्य अनुगृह्णन्ति ।

राजा—अस्य प्रसादस्य अनुरूपं सम्मानम् अर्हन्ति एव ते देववाण्यां हि कृतश्रमाः सर्वे । पश्य –

यज्ञस्य वाचः पदवीयमायन् तामन्वविन्दन् ऋषिषु प्रविष्टाम् ।
तामाभृत्या व्यदधुः पुरुत्रा तां सप्तरेभा अभिसंनवन्ते ॥

मन्त्री—सत्यम् एतत्, सुरभारत्या आघोष एव 'यं कामये तं तमुग्रं कृणोमि' इति । अतः तस्याः कृपापीयूषबिन्दुपानाऽमन्देहाः सर्वेऽपि कवयः सदा तस्या आशिषः प्रार्थयन्ते—

शशिकररुचिभाजो देववाचोऽमराया
विलसतु रसनेऽस्मिन् पावनोऽसौ विलासः ।
निहततिमिरलेखं यस्त्वमन्दं सुधायाः
क्षरति नवरसायाः स्यन्दमानन्दकन्दम् ॥

राजा—साधु मन्त्रिन् ! साधु, अत एवाहं प्रतिक्षणं तादृशां कवीनां सम्प्राप्तिं प्रतीक्षमाणस्तिष्ठामि ।

(प्रविश्य)

प्रतीहारः—देव ! सम्प्राप्तः ।

राजा—अयि कः ?

प्रतीहारः—कश्चन कविः । दर्शनार्थं द्वारि तिष्ठति ।

राजा—अहो ! सुप्रभातम् अद्य । (प्रतीहारं प्रति) भद्र ! प्रवेशयय तं सादरम् ।

प्रतीहारः—यथा देवादेशः । (निष्क्रम्य पुनः कविना सह प्रविश्य) इत इत आर्यः । एष देवः । (निष्क्रान्तः)

राजा—(सादरम्) कविवर ! अभिवादये ।

कविः—स्वस्ति भवते ।

राज—कं देशं कृतवान् वियोग-विधुरं विद्वन् समुद्दिश्य किम् ।

कविः—काश्मीरेभ्य उपागतः कविरहं कांक्षन् भवद्-दर्शनम् ।

राजा—मन्ये, रिक्तकरो भवानभिलषत्यर्थं ··· ···

कविः—न मेऽर्थे स्पृहा ।

राजा—किं कुर्यामपरम् ··· ···

कविः—त्वमेधि शरणं काश्मीरकाणां नृप ।

सर्वे उपस्थिताः—धन्योऽयं ! परार्थविलष्टः यः कल्पतरुजयिनं महाराजम् उपगम्याऽपि न किमपि याचते ।

राजा—कविवर्य ! अर्हणीयोऽसि सताम् । कथय, कुतः खलु काश्मीरकाणां रक्षणं प्रार्थयसे ?

कविः—महाराज ! किं तावद् अविदितं चारचक्षुषः भवतः । नरवपुषा राक्षसेन मिहिरकुलेन भक्ष्यमाणानां काश्मीरजनानां नाऽस्ति भवतोऽपरः त्राता ।

राजा—नियतं महता कष्टेन जनानां भवितव्यं यद् भवान् एवं यात्रा-दुःखम् अनुभूय अत्र सम्प्राप्तः । कैर् अक्षरैर् भवान् भुवि अभिधीयते ?

कविः—

कर्मबन्धस्य महतः क्षपणाय महीमिमाम् ।
वर्द्धमाने दधद् भक्तिं यश्चरेद् विद्धि तं नृप ॥

राजा—निपुणम् अभिहितं क्षपणक इति ।

सभासदः—अहो वक्रोक्तिनैपुण्यम् अत्रभवतः !

राजा—अथ तस्य हूणापसदस्य अत्याचारान् श्रोतुम् इच्छामि ।

कविः— महाराज ! नाऽस्ति तेषाम् इयत्ता यत् कृत्स्नशः वर्णयानि ।

समासतः श्रूयताम्—

उत्कीर्णा धरणी धनाय सकला गेहैः समं क्रोडवत्
क्षुत्क्षामाः करसंग्रहेण विहिताः कङ्कालशेषाः प्रजाः ।
उद्वृत्तेन ससैनिकेन वलिना वृत्ते हते निर्घृणं
नार्यो देहधनाश्चरन्ति कृपणास्त्राणं न विन्दन्ति च ॥

राजा—(सरोषम्) आः अतिक्रान्तमर्याद हूणापसद ! अयं न भवसि ।

पुत्रेभ्योऽपि प्रियतराः प्रजा राज्ञां सुनिश्चिताः ।
कैः पुण्यैर्वर्तसेऽनार्य तासां क्लेशं समाचरन् ॥

(कविं प्रति) कविवर्य ! विस्रब्धो भव । समागतः क्रूरस्य तस्य प्रजानां च क्लेशस्य अन्तः । अधुना विश्राम्यतु भवान् । (अन्यान् कवीन् अपि दृष्ट्वा) भवन्तोऽपि विश्राम्यन्तु । (आसनाद् उत्तिष्ठन् मन्त्रिणं दृष्ट्वा) अत्रभवतः क्षपणकस्य निवासादिकं सकलं संविधानकं कारय ।

मन्त्री—यद् आज्ञापयति देवः। (कविं प्रति) कविवर्य, आगम्यतां मया सह।

(निष्क्रान्तः)

राजा—(सचिन्तः परिक्रामन् आत्मगतम्) हूणानाम् अत्याचारैः नितरां पीडिताः प्रजाः। काश्मीरेषु मिहिरकुलः तासां रक्तशोषकः। मध्यदेशश्च तोरमाणेन उपप्लुतः। कथम् एतेषां कदर्याणाम् उन्मूलनं स्यात्? (स्मृतिम् अभिनीय) प्रधानमन्त्रिणा संमन्त्र्यैव किमपि प्रतिविधानं चिन्तनीयम्।

प्रतीहारः—(प्रविश्य) विजयतां महाराजः। एष प्रधानमन्त्री द्वारि वर्तते।

राजा – अवारितं प्रवेशय।

प्रतीहारः—(विनम्य) तथा। (निष्क्रम्य पुनः प्रधानमन्त्रिणा सह प्रविशति) इत इत आर्यः। (परिक्रम्य) एष महाराजः। उपसर्पतु आर्यः।

प्र० म०—(उपसृत्य) विजयतां देवः।

राजा—(परिवृत्य विलोक्य च) कथं वेतालभट्टः? स्वागतं प्रधानमन्त्रिणे। का खलु प्रवृत्तिः हूणानाम?

प्र० म०—अधुना एव चरेभ्य उपलब्धं यत् तोरमाणः मिहिरकुलः च उभौ आक्रमणाय संनह्येते।

राजा—(सचिन्तम्) उभयत आक्रमणेन द्विधा विभज्यते बलम्। कथम् एकपदे उभाभ्यां योद्धव्यम्?

प्र० म०—अस्मिन् सङ्कटे सपक्ष-संश्रयः कार्यं इति नीतिविदः कथयन्ति। तथाहि—

सहायाः साधनोपायाः विभागो देशकालयोः।
विनिपात-प्रतीकारः सिद्धिः पञ्चांगमिष्यते॥ इति।

राजा—सन्ति भूयांसः, भूमिपतयः ये अस्माभिः सह सख्यं भावयन्ति। कतमस् तावद् आमन्त्र्यतां सहकाराय।

प्र० म० - मम दृष्ट्या तु मगधेश्वरः बालादित्य एव साधीयान्। सोऽपि वयम् इव हूणैः कदर्थितः।

राजा—(सवितर्कम्) किम् उक्तम् बालादित्यः?

प्र० म०—अथ किम्?

राजा—(प्रसादम् अभिनयन्) वेताल! निपुणम् अभिहितं भवता। सङ्कट सब्रह्मचारी प्रकृत्या च मित्रं सः। द्रुतं प्रेषय कञ्चन सोपायनं तस्य समीपम्।

(सहसा प्रविश्य)

प्रतीहारः—जयतु देवः ! प्रधानमन्त्रिणो गृहात् प्रधानपरिजनः प्राप्तः। अविलम्बं मन्त्रिणं च द्रष्टुम् इच्छति ।

राजा—किम् ! प्रधानमन्त्रिणः गृहात् परिजनः प्राप्तः ? अवारितं प्रवेशय।

प्रतीहारः—तथा ।

(इति निष्क्रान्तः)

(ततः प्रविशति सञ्जीवकः)

सञ्जीवकः—जयतु देवः । जयतु भर्ता । त्वरतां त्वरतां भवान् ।

(इति सोद्वेगः तिष्ठति)

मन्त्री—सञ्जीवक, किं तावद् उद्विग्न इव असि ।

सञ्जीवकः—भर्तः, सहसा रुजाऽऽक्रान्तः कुमारः न संज्ञां प्रतिपद्यते ।

राजा—कष्टं भो कष्टम् ।

ब्रुडन्तं प्लवमुद्धर्तुं यतमाने तु नाविके ।
तस्यैव करतोऽरित्रं स्खलितं पयसां निधौ ।।

वेताल, आत्ययिकम् इदम् । एहि, प्रथमं खलु वत्सं संभावयावः । तस्य रुजः प्रतिविधानं कृत्वैव ततः अन्यच् चिन्तयिष्यावः ।

वेतालः—शान्तं पापम् । महाराज, राष्ट्रीयसङ्कटस्य प्रतिविधानं प्रथमं कार्यम् । तदनन्तरम् अन्यत् । (सञ्जीवकं दृष्ट्वा) वैद्यं सनातनं दृष्ट्वा तस्मै सर्वम् आवेदय । अहम् अपि क्षिप्रम् आगच्छामि ।

(सञ्जीवकः निष्क्रान्तः)

राजा—साधु मन्त्रिधुरन्धर, साधु ! न यस्य पुत्रप्रेम्णाऽपि आकुलीक्रियते मतिः ।

वेतालः—राष्ट्रभक्तिः मां बाधतेऽन्यच्-चिन्तनात् । मया स्वयं गन्तुं चिन्तितम् आसीद् बालादित्यस्य सकाशम् ।

राजा—नहि नहि, एवं स्थिते वत्से न भवान् अर्हति तत्र गन्तुम् । कालिदासः तावत् प्रेष्यताम् ।

वेतालः—(साश्चर्यम्) कालिदासः ? कविः अयं किम् अस्मिन् कर्मणि करिष्यति ?

राजा—वेताल, न परिचिनोषि कालिदासं येन एवं वदसि ।

वेतालः—यथा मन्यते महाराजः ।

राजा—तर्हि एहि । कालिदासं सम्बोध्य प्रेषयात्र वत्सं च पश्याव ।

वेतालः—तथा ।

(राज्ञा सह निष्क्रान्तः । जवनिका-पातः)

द्वितीयं दृश्यम्

(स्थानं —वेतालभट्टस्य भवनम् । एकस्मिन् कक्षे मन्त्रिपुत्रः शय्यायां शयानः तिष्ठति । तस्य निकटे विषण्णा माता उपविष्टा । एकः सेवकः नाऽतिदूरे स्थित) ।

माता—(पुत्रं हृदये शिरसि च स्पृशन्ती) जात ! अपि सह्या वेदना ?

पुत्र.—(क्षीणस्वरेण) अम्ब ! नहि तावत् प्रत्युत उत्तरोत्तरं वर्धते । भिद्यत इव ललाटः । क्वथत इव हृदयम् । अङ्गानि मोट्टायन्ते इव । सूची इव तुदति कुक्षौ । जडीभूतम् इव शरीरम् । संहता इव सन्धयः ।

माता—(सकरुणम्) हा अकरुणाः खलु ईश्वराः । किम् एकपद एव जातम् । (करेण तस्य कपोलं स्पृशन्ती) कमलवत् प्रफुल्लं वदनं क्षणेन म्लानम् ।

(अश्रूणि मुञ्चति)

सेवकः—(शनैः शनैर्निकट आगत्य) भट्टिनि ! अलं वैक्लव्येन । आतुरः खलु भवत्या स्वयम् आश्वासनीयः ।

माता—(रुदन्ती) अङ्ग ! अस्य दशां दृष्ट्वा नाऽहम् आत्मानं संस्थापयितुं प्रभवामि । कथं तावद् इमम् आश्वासयानि ।

सेवकः—सत्यम् एतत् । परं भवत्या वैक्लव्येन अयम् अपि धैर्यं त्यक्ष्यति । आदिश माम्, किम् अत्र करोमि ।

माता—वैद्यराजं सनातनं ब्रूहि, क्षिप्रम् आगत्य निरीक्षस्व बालम् इति ।

सेवकः—एष गच्छामि ।

(सत्वरं गच्छति)

पुत्रः—अम्ब !

माता—जात ! किं कथयसि ?

पुत्रः—त्वं कथं रोदिषि ?

माता—त्वां म्लानं दृष्ट्वा ।

पुत्रः—खलु रुदित्वा । अहं लघु एव उल्लाघो भविष्यामि ।

माता—(अश्रूणि करेण प्रमृज्य) अस्तु, नाऽहं रोदिमि ।

पुत्रः—क्व तावत् मम क्रीडनकानि ?

माता—(सस्नेहं) तत्र सुरक्षितानि । इदानीं स्वपिहि ।

पुत्रः—(क्षणं स्थित्वा) अम्ब ! तातपादाः क्व गताः ।

माता—(सकरुणम्) वत्स, राज्ञः समीपे । प्रेषितः खलु सञ्जीवकः तान् सूचयितुम् ।

(सेवकः सहसा प्रविश्य)

सेवकः—भट्टिनि ! सम्प्राप्तः सनातनः वैद्यराजः ।

(अन्यतः सनातनः प्रविशति । माता शरीरं वस्त्रेण साधु आवृत्य उत्थाय एकतः तिष्ठति ।)

सनातनः—(निकटे आगत्य) अलं सम्भ्रमेण । तिष्ठतु अत्रभवती । किं तावद् उद्वेगकारणम् ?

माता—(दीनस्वरेण) भिषग्वर ! प्रयुक्तेऽपि भेषजे किम् अस्य कष्टम् उत्तरोत्तरं वर्धते ?

सनातनः—वातस्याऽऽक्रमणम् ईदृशम् एव भवति । आदौ कष्टस्य तीव्रतैव अनुभूयते । वीर्यवन्तो रसाः प्रयुक्ताः क्षिप्रं प्रभावं दर्शयिष्यन्ति ।

(सहसा प्रविश्य)

सञ्जीवकः—मन्त्री सह महाराजोऽपि कुमारं मन्दं श्रुत्वा द्रष्टुम् आयातः ।

(माता सन्निहितं कक्षं प्रविशति, वेतालभट्टः कतिपयपरिजनपरिवृतः राजा च दृश्येते । पुरोगामिनः प्रतीहाराः 'उत्सरत उत्सरत । एष परमभट्टारकः महामाहेश्वरः महाराजाधिराजः यशोधर्मदेवः स्वागमनेन अनुगृह्णाति' इति घोषं कुर्वन्ति । समनन्तरम् एव प्रधानमन्त्रिणाऽनुगम्यमानः राजा सरभसपदः शय्याया निकटम् आगच्छति । सनातनः किञ्चित् प्रह्वीभूय नमस्कृत्य च स्तोकम् अपसर्पति । राजानं दृष्ट्वा मन्त्रिपुत्रः शय्याया उत्थातुं चेष्टते ।)

राजा—(हस्तेन बलात् तं शाययन्) अलम् अलम् उपचारेण। न बलाद् उत्थातुम् अर्हति वत्सः (वैद्यम् अभिवीक्ष्य) को रोगः निर्णीतः भवता ?

सनातन—मम अन्येषां च भिषजां मतेन वातरोगस्यैव आक्रमणम् ।

राजा—भवान् आग्निवेश्ये सौश्रुते च अष्टाङ्गायुर्वेदे पारङ्गतः। किं भवदीयं विज्ञानं नाऽत्र बाले फलति ?

वेतालभट्टः—युक्तम् आह देवः ।

मन्त्रिणां भिन्नसन्धाने भिषजां सान्निपातिके ।
कर्मणि व्यज्यते प्रज्ञा स्वस्थे को वा न पण्डितः ॥

(पुत्रं स्नेहेन पश्यति । तावत् स बुद्बुदायते। वस्त्राणि क्षिपति। पाणिपादं धूनयति । सर्वं सचिन्तं पश्यन्ति ।)

सनातनः—(त्वरितम् उपसृत्य नाडीं गृहीत्वा) हुम् ! ज्वरः खलु तीव्रो जातः। किं कारणम्, बलवन्ति भेषजानि अपि रोगं न निगृह्णन्ति ।

वेतालः—(सोद्वेगम्) राज्यस्य धुरन्धरैर्वैद्यैः सुचिकित्सितोऽपि यदि न वैरुज्यं गच्छति, तर्हि दैवम् अत्र अपराध्यति ।

सनातनः—मन्त्रिप्रवर ! अलं वैक्लव्येन । यावच्छक्यं यतामहे । अन्योऽपि यदि कश्चिद् भिषक्, सोऽपि आहूयताम् ।

वेतालः—अस्ति कश्चिद् अपर एतादृशो वैद्यः ?

सेवकः—भर्तः, श्रूयते कश्चित् काशिकः अगदङ्कारः अत्र आयातः। पीयूषपाणिं तं जनाः कथयन्ति ।

राजा—यद्येवं घुष्यतां नगरे यः कोऽपि भिषक् प्रधानमन्त्रिसुतं विरुजं विधास्यति सहस्रं स्वर्णमुद्रा राजसभास्तारपदं च लप्स्यते इति ।

सेवकः—विजयतां महाराजः। एष गच्छामि डिण्डिमवादकसकाशम् ।

(निष्क्रान्तः)

राजा—वेताल ! वत्सस्य अभ्यङ्गस्वेदादिविधानं यथाकालं कारणीयम्। साधयामो वयम् ।

(निर्गच्छति । वेतालः तम् अनुयाति)

(जवनिका-पातः)

तृतीयं दृश्यम्

(स्थानं—मगधेश्वरस्य राजभवनस्य द्वारदेशः। एकतः दौवारिकः वेत्रपाणिः तिष्ठति। अपरतः प्रविशति सेवकेन अनुगतः कालिदासः।)

कालिदासः—अहो! राजनयिकानाम् अविश्रान्ता कार्यपरता।

लक्षितपरप्रचारा प्रहाररक्षाप्रयोगकृतचिन्ता।
चतुरङ्गकेलिललिता नृपनीतिः सुखा च विषमा च॥

अथवा दिनचर्यैव राज्ञां तदाश्रितानाँ च तथाविधा इति न किमपि नूतनम्। विशेषतः तु वैदेशिकैः क्रूरैश्च हूणैः सह संघर्षे स्थिते क्व एषां विश्रमः। कुतः—

प्रजा रक्ष्या नित्यं सुतवदखिला ईति-विषमाच्
चरैर्दृग्भिर्दृश्या रिपुसुहृदुदासीनगतयः।
स्वपक्षक्षेमार्थं सकलविपदां चिन्तनविधिः
परच्छेदोद्योगो जनहृदयविस्रम्भजननः॥

मातृभूमेस्तु स्वातन्त्र्यरक्षायै इदानीं मालवेश्वरस्य मुख्यः यत्नः। अत एव मयाऽपि तादृशे गुरुणि प्रयोजने साधनीये दौत्यं प्रतिपन्नम्। देशे हि सङ्कटग्रस्ते प्रत्येक नागरिकेण यथाशक्यं प्रतीकाराय यतनीयम्। भवतु। मगधेश्वरं तावत् पश्यामि (परिक्रम्य दृष्ट्वा च) इद तावद् राजद्वारम्। एष च दौवारिकः। (उपसृत्य) भद्र, अस्ति कच्चिद् दर्शनकालः मगधेश्वरस्य?

दौवारिकः—(आपादमस्तकं दृष्ट्वा) अथ किम्। को भवान्? किं निमित्तं च महाराजं द्रष्टुम् इच्छति?

कालिदासः—वैदेशिकः दूतः खल्वहम्। गच्छ, निवेदय मगधेश्वराय, मालवेभ्यः दूत आगत इति।

दौवारिकः—हुम्, मालवेभ्यो दूतः? तिष्ठतु भवान्। एष गच्छामि।

(अन्तर्गत्वा निष्क्रम्य च)

एष मगधेश्वरः भवतः प्रवेशम् अनुजानाति। प्रविशतु भवान्।

कालिदासः—(सस्मितम्) तथा। (अनुचरेण सह प्रविशति।)

अन्तर्दृश्यम्

(मगधेश्वरस्य सभाभवनम् । मगधपतिः सिंहासनम् अध्यास्ते, अमात्यः, सभासदश्च यथास्थानं स्थिताः ।)

मगधे०—अमात्य !

अमात्यः—आज्ञापयतु देवः ।

मगधे०—ननु केन प्रयोजनेन मालवेश्वरेण दूतः प्रहितः स्यात् ?

अमात्यः—देव ! भवतः संग्रामसुहृत् तत्रभवान् इति यदा कदा दूत-सम्पातं करोत्येव ।

मगधे०—अस्ति एतत् । परं चरैर् विज्ञापितं मालवीयसीमान्तं हूणैर् उपद्रुतं पुरस्कृत्य अन्यद् एव संभावयामि ।

अमात्यः—(सशिरःकम्पम्) प्रसन्नः देवस्य तर्कः । सम्भाव्यते तदपि । (सम्मुखे दृष्ट्वा) ननु एष दूत आपतित एव । सर्वं विशदं भवति ।

(ततः प्रविशति कालिदासः प्राभृतकहस्तः सेवकश्च)

कालिदासः—(उपसृत्य दक्षिणं हस्तम् उद्यम्य) स्वस्ति अत्रभवते मगधेश्वराय ।

मगधेश्वरः—(स्वस्ति शब्देन ब्राह्मणम् अनुमीय आसनाद् उत्थाय) ।

अमात्यः—अभिवादये अत्रभवन्तम् ।

कालिदासः—(अभयमुद्रया) विजयतां भवान् । अविहितं प्रसरतु यशः-पुरःसरः प्रतापः ।

मगधे०—अनुगृहीतः अस्मि । भो, आसनम् अत्रभवते ।

(एकः सेवक आसनं न्यस्यति ।)

कालिदासः—भवान् अपि आसन-परिग्रहं करोतु । (नाट्येन उपविशति)

(राजा अमात्यश्च निषीदतः ।)

मगधे०—कच्चित् कुशली मालवेश्वरः ?

कालिदासः—महाकालप्रसादात् कुशली मालवपतिः भवन्तं च काये राज्ये च अनामयं पृच्छति ।

अमात्यः—सर्वथा अनामयः खलु अत्रभवान् ।

कालिदासः—देव ! एष प्राभृतकप्रगुणीकृतः लेखः प्रहितः मालवपतिना ।

(सेवकः प्राभृतकपात्रम् उद्घाटच राज्ञः पुरस्ताद् न्यस्यति। राजा च परिजनं सङ्केतेन अपनयनाथ निर्दिशति। कालिदासः पत्रम् अर्पयति।)

राजा—(मन्त्रिणे दत्त्वा, वाचयतु भवान्, किं तावत् सन्दिष्टम् ?

मन्त्री—(नाटचेन वाचयति) स्वस्ति श्रीमहाभागवतं परमभट्टारकं प्रियसुहृदं महाराजाधिराजं नरसिंहगुप्तबालादित्यं प्रेम्णाऽऽलिङ्ग्य इत उज्जयिन्या मालवेश्वरो यशोधर्माऽनामयप्रश्नपूर्वकं विज्ञापयति। काश्मीरेषु गुर्जरेषु राजस्थाने चाऽऽक्रम्य अधुना हूणैर्मध्यदेशोऽपि उपद्रुतः। श्रूयते च भवद्-राज्य-सीमनि अपि तेषां प्रसरः। एवम् अङ्गुलिग्रहणन्यायेन तेषां सर्वस्मिन् अपि भारते प्रसारोऽधिकारश्च निश्चितः। एतादृशे व्यतिकरे तेषाम् उपेक्षणं स्वहस्तेन अङ्गाराकर्षणं भवेत्। एतं सङ्कटम् उत्प्रेक्ष्य मया तेषाम् उन्मूलनाय सज्जीकृतः निस्त्रिंशः। भवान् अस्माकं समरसुहृद् इति अस्मिन् पुण्ये कर्मणि सधर्माणं भवन्तं संभावयामि। एतदर्थं च अस्मत्-सभारत्नं कविवरः मातृगुप्तकालिदासः अपुष्कलेन उपायनेन सह भवतः विधे प्रेष्यते। आत्मीयम् अभिप्रायं स्वीकार्यम् अभिसन्धिं च भवान् मातृगुप्त-मुखेन प्रेषयिष्यति इति।

स्वहस्तलेखाङ्कितं
राजाधिराजयशोधर्मणः

मगधे०—(साकूतम्) अहो, भवान् विश्रुतकीर्तिः मातृगुप्तः ! धन्या वयं भवतः दर्शनेन।

मातृगुप्तः—देव, इदानीं तु अहं दौत्य-प्रसङ्गेन देवस्य पादमूलम् उपस्थितः।

अमात्यः—कविवर्य, दीर्घः खलु कालः हूणानां काश्मीरेषु शासनम्। मध्यदेशे च न तेषां प्रवेशः नूतनः। तत् कथं नु मालवेश्वरेण अधुना एव चिन्तितः तेषाम् उच्छेदः ?

मातृगुप्तः— महामात्य ! अलं संशयेन। हूणाः किल न अद्यावधि मालवसीमानं स्पृशन्ति। अतः न हि तावत् तेभ्यः भीतेन तेन चिन्तितः संगरः।

मगधे०—(सस्मितम्) अमात्य ! दूरदर्शी खलु मगधेश्वरः। काश्मीरेषु गुर्जरेषु च बद्धमूला अमी जाल्माः शेषं भारतम् अपि जिघ्रसिषन्ते। अत इदानीम् अपि तेषां निरोधः चिन्तनीय. इति तत्रभवतः अभिप्रायः।

मातृगुप्तः—यथार्थदर्शी अत्रभवान् । अस्ति अन्यदपि कारणम् ।

अमात्यः—किं नु तत् ?

मातृ०—काश्मीरकैः प्रार्थितः तत्रभवान् मालवेशः हूणपीडितानाम् अस्माकं शरणं भव इति ।

मगधे०—(सदयम्) क्षत्रियस्य धर्मः खलु आर्तानां त्राणम् । स्थाने कृतपरिकरः मालवपतिः ।

अमात्यः—अत्र का प्रतिपत्तिः देवस्य ?

(सहसा एकः राजपुरुषः पृष्ठतः बद्धकरौ पुरुषौ अग्रतः कृत्वा प्रविशति ।)

राजपुरुषः—जयतु भर्ता । जयतु अमात्यः ।

अमात्यः—(सभ्रूक्षेपम्) जालुक ! किम् एतत् ?

जालुकः—अमात्य ! इमौ हूणगुप्तचरौ स्कन्धावारस्य समीपे सेनानिवेशस्य मानचित्रं निर्मिमाणौ दृष्टौ ।

मगधे०—(सक्षोभम्) अपि हस्तगतीकृतं तत् मानचित्रम् ?

जालुकः—अथ किम् । अन्वेषणानन्तरं पत्रमपि एकम् अनयोः सकाशाद् आसादितम् ।

(पत्रम् उद्घाटय अमात्य-हस्ते अर्पयति)

मन्त्री—(वाचनम् अभिनयन्) देव ! इदं खलु चित्रलिप्यां लिखितं तोरमाणस्य कञ्चिद् हूणाधिकारिणं प्रति ।

मगधे०—(संभ्रान्तः) मन्ये, असौ क्वाऽपि अत्रैव सन्निहितः ।

अमात्यः—कः सन्देहः । सन्दिष्टं तु शृणोतु देवः ।

मगधे०—अवहितः अस्मि ।

अमात्यः—क्षिप्रं मालवदेशोपरि आक्रमणं निश्चितम् । अतः तव कर्तव्यं मगधेषु विस्फोटादिकार्येण व्यग्रताऽऽपादनं रहस्य-संग्रहश्च येन मगधेश्वरः न यशोधर्मणः साहाय्याय कल्पेत । जिते तस्मिन् मगधानां पर्य्यायः इति ।

मातृ०—(साकूतम्) दृष्टं देव ! कथम् एते जाल्माः एकैकशः सर्वं भारतं जिगीषन्ति ।

मगधे०—(सक्रोधं दक्षिणकरेण श्मश्रु परामृशन्) आः हूणापसद ! जीवति अस्मिन् नरसिंहे न फलिष्यति तव भारत-जयाशा। (जालुकं प्रति) जालुक ! अपनय एतौ हूणापसदौ चित्रवधेन शुनां भक्ष्यौ विधेहि।

जालुकः—(प्रणम्य) तथा। (जिगमिषति)।

अमात्यः—शृणु तावत्।

जालुकः—(परिवृत्य) आज्ञापयतु अमात्यः।

अमात्यः—(कर्णे) ताडयित्वा पूर्वम् एतयोर् अधिकारिणं मूलादि च ज्ञातुं यतनीयम्।

जालुकः—प्रथमः कल्पः। (प्रणम्य ताभ्यां सह निष्क्रान्तः)

मगधे०—अमात्य ! विदितार्थोऽसि हूणानां कांक्षिते। किम् इदानीं युक्तं मन्यसे।

अमात्यः—सङ्कटे द्वारम् आपन्ने क्व दूरमभिसर्पणम् ?
मातृगुप्तः—सजातिविपदा क्षीणः बिले सिंहोऽपि बध्यते।

(मगधेश्वरः सविस्मयं तस्य मुखं प्रेक्षते)

अमात्यः—(सभ्रूभङ्गम्) किं भवान् अभिप्रैति ?

मातृ०—मम अभिप्रेतं देवः साधु बुध्यते। एकाकिना केनाऽपि नृपेण नैते जेतव्या इति। अयम् एव भारतीयानां दोषः वैदेशिकानाम् अत्र अधिकारे मूलम्। एकस्मिन् राजनि आक्रान्ते अन्यैर् उदासितम्।

मगधे०—सत्यं भवान् ब्रवीति। एकैकं विजित्यैव वैदेशिकाः प्रभुत्वं प्राप्ताः। संहत्य प्रतिरोधस्तेषाम् अपेक्ष्यते।

मातृ०—इयम् एव दृष्टिः मालवेश्वरस्य। स खलु संहतानां यत्नेन एकपदे मूलच्छेदम् एषाम् अभिलषति।

मगधे०—अस्त्येतत्। अविस्मरणीयः पराक्रमः खलु सम्राजः कुमारगुप्तस्य स्कन्दगुप्तस्य च। साम्राज्यसम्पदा विभूषितैर् अस्मत्-पूर्वजैर्भारतादपि निष्कासिता अभवन् हूणाः। (दीर्घं निःश्वस्य) परम् अधुना ...

मातृगुप्तः—(राज्ञः भावावेशम् अभिज्ञाय विषयम् उपसंहरन्) देव ! किन्नु मयाऽऽवेदनीयं तत्रभवते ?

मगधे०—ब्रूहि मद्-वचनात् तत्रभवन्तं मालवेश्वरम् उपकरणं भवतः बालादित्य इति ।

व्रते, मतेऽथ सङ्कल्पे विजेतव्येऽपि नाऽऽवयोः ।
द्वैतं, समानकृत्येषु कथं भेदो नु युज्यते ॥

अभिसन्धिस्तु नः (कर्णे) एवमिव ।

मातृ०—अहो ! युक्तदर्शिता मगधाधिपस्य । स्थाने खलु विस्रम्भः मालवपतेः ।

सव्रताः समसंकल्पाः सधर्माणः सविक्रमाः ।
समानमतयश्चाऽपि न विषीदन्ति कर्हिचित् ॥

अस्तु । अनुजानातु मां देवः । सम्प्रति साधयामि अहम् ।

मगधे०—प्रतिपालय मुहूर्तम् । (अमात्यं प्रति) प्रत्युपायनं तत्रभवते मालवेश्वराय । अनुरूपसम्मानेन च तोषणीयः अयं कविवर्यः ।

अमात्यः—एष प्रकल्पयामि सर्वम् । (गन्तुम् इच्छति)

मातृगुप्तः—अमात्य, अलं सम्भ्रमेण । देव, विज्ञापयितव्यं किञ्चित् ।

मगधे०—किं विवक्षितं भवतः ?

मातृ०—द्रष्टव्याः खलु मया भूयांसो नरपतयः अनेन प्रसङ्गेन । निभृतं च गन्तुम् ईहे यथा मा खलु परेषां विदितः भूत् अयम् अर्थः । अतः तावत् सर्वम् अत्रैव तिष्ठतु ।

मगधे०—भवतु । साधयतु भवान् पुनर्दर्शनाय ।

मातृगुप्तः—विजयतां भवान् ।

(निष्क्रान्तः)

मगधेश्वरः—(आसनाद् उत्थाय) कृतं कालहरणेन । अस्माभिर् अपि क्षिप्रं प्राप्तकालम् अनुष्ठेयम् ।

अमात्यः—किं तावद् देवेन प्रतिपन्नम् ?

मगधे०—तीर्थयात्रापदेशेन हूणानां मूलोच्छेदाय श्व एव प्रस्थातुम् इच्छामि ।

अमात्यः—करणीयम् एव आपतितम् । परं मालवसीमान्तं परित्यज्याऽपि ततो नाऽतिदूरे स्थातव्यम् ।

सेनापतिः—एतेन किं भविष्यति ?

अमात्यः—हूणानां वञ्चनम् । एकाकी तावन् मालवेश्वरः युध्यत इति तेषां विस्रम्भ उत्पादनीयः ।

मगधे०—सेनापते ! अपि रोचते त इयं रणनीतिः ?

सेनापतिः—देव ! नीतिविषये अमात्यः देवो वा प्रमाणम् । अहं

तु एतद् एव जानामि—

भवन्तु रिपुशोणितोक्षितसुशोणधाराधरा
दिनेश-कर-दन्तुराः प्रखरकुन्तका भास्वराः ।
करालकरवालकोल्लसितमुष्टिभास्वत्करा-
श्चिराद् रण-महोत्सव-प्रमुदिता इमे किंकराः ॥

मगधे०—(सोत्साहम्) यदि एवं तर्हि—

सद्योऽवालतमालमेचकरुचा खड्गेन खट्कारिणा
हूणान् लूनशिरोंसबाहुचरणान् दूनान् दिशो द्रावयन् ।
चण्डः खण्डितरुण्डमुण्डनिवहैरन्त्रैः श्मशाने रणे
कर्ताऽहं नरसिंहभैरववपुः श्रीभूतनाथार्चनम् ॥

(सर्वतः 'विजयतां मगधेश्वरः, विजयतां नरसिंहबालादित्य' इति घोषः) ।

सेनापतिः—सैन्य-परिमाणविषये कः निर्णयः ?

अमात्यः—चतुरंगबलं खलु सन्देहम् उत्पादयति । अधुना दशसाहस्र्या सादिनां गन्तव्यम् । सति आवश्यके पश्चात् प्रेषयिष्यते ।

मगधे०—सेनापते ! गच्छ, ताड्यतां प्रयाणपटहः ।

सेनापतिः—एष क्रियते देवादेशः । (निष्क्रान्तः)

मगधे०—अमात्य ! कूटचारिणां हूणानां निग्रहाय विशेषेण यतनीयम् । अथवा किं बहुना—

दुर्गं पुरं प्रजा राज्यं सर्वं भवति संश्रितम् ।
वयं तु सोमनाथस्य दर्शनाय कृतक्षणाः ॥

अमात्यः—अलं चिन्तया ।

प्रत्ययो मयि यो न्यस्तः प्रभुणा प्रभविष्णुना ।
स प्रज्ञा च सदाऽव्यग्रा सकलं शं विधास्यतः ॥

मगधे० —तद् एहि । यथासङ्कल्पितम् अनुतिष्ठावः ।

(नेपथ्ये बन्दिनः)

कौमारीं स्कान्दगुप्तीमथ च चलकुभावंक्षुवानीरलग्नां
हूणीभिर्वाष्पवेगस्खलितपदकलं कीर्त्यमानां सुकीर्तिम् ।
भूयः सञ्चारयिष्यन् कनककशिपुतां प्रापयित्वाऽथ हूणान्
बालादित्यप्रतापो जगति विजयताम् एष गुप्तो नृसिंहः ॥

(सर्वे निष्क्रान्ताः)

द्वितीयोऽङ्कः

प्रथमं दृश्यम्

(मालव-राजभवनस्य मन्त्रणा-गृहम् । परित आसन्द्यः संस्तृताः । मध्ये काष्ठपीठं (Table) वर्तते । वेतालः राज्ञः दक्षिणपार्श्वे स्थितायाम् आसन्द्याम् उपविशति । सूचकस्तु स्थितः ।)

वेतालः—(सूचकं प्रति) कथय, का प्रवृत्तिः शत्रूणाम् ?

सूचकः—शृणुतां देव आर्यश्च, मालवसीम्नः अविदूरे हूणानां स्कन्धावारः । संघर्षश्चाऽस्मत्सैन्यैः सह प्रवृत्तः ।

वेतालः—(राजाभिमुखम्) मिहिरकुलस्याऽपि आगमनं नेदीय एव इति तर्कयामि ।

राजा—निश्चितप्रायम् एतत् । (सूचकं प्रतिः) अंग, अपि दृष्टः कालिदासः ?

सूचकः—अथ किम् ? (कञ्चुककक्षात् पत्रम् आकृष्य दर्शयति) इदं पत्रं प्रहितं तेन ।

राजा—(वेतालं प्रति) वाच्यतां तावत् । किमत्र सन्दिष्टम् ?

वेतालः—तथा । (सूचकहस्तात् पत्रं गृहीत्वा वाचयति) । 'स्वस्ति महाराजाय यशोधर्मणे । यथादेशं दृष्टः बालादित्यः । स विज्ञापयति । एक एव

सङ्कल्पः समानं च व्रतम् आवयोः। एतैर्वैदेशिकैः सह वयं न एकाकिनः योद्धुं पारयामः। मिलिता सङ्घशक्तिर् एव अत्र प्रभविष्यति'।

राजा—साधु बालादित्य ! साधु, इदानीं त्वम् असि। ततस्ततः।

वेतालः—एतस्मिन् कर्मणि अहं सर्वात्मना भवतां सहायः। अभिसन्धिस्तु सूचकमुखेन ज्ञातव्यः। इति।

भवदीय आश्रवः

मातृगुप्तः

(राजा वेतालश्च अन्योन्यं पश्यतः।)

राजा—निष्पन्नं नः समीहितम् (सूचकं प्रति शनैः) भद्र, अलं सङ्कोचेन। (आसनं निर्दिश्य) अत्र उपविश्य आवेदय यद् अभिसंहितम्।

सूचकः—यद् आदिशति देवः। (उपविश्य) शृणुतां देवः अमात्यश्च सन्देशम्—

त्वरमाणे सुसंविष्टे सूर्यवंशोऽपि मूलतः।
परिक्लेशं करोत्येष विगृह्णाणोभयस्थितः।
आदित्यः पृष्ठतो हन्ति मेषयुद्धेन मोहितम्।
पार्श्वतः कुलमायातं करोति यमदर्शनम्॥

राजा—(वेतालाभिमुखं विलोक्य) कः अभिप्रायः?

वेतालः—(सस्मितम्) देव, रहस्य-रक्षणाय कूट-भाषा प्रयुक्ता कविना। अस्य अर्थः—तोरमाणः साधु सज्जया स्थितः। मिहिरकुलः मूलम् आक्रमिष्यति। सैन्यस्य एकभागेन व्यामोह्य शत्रवः स्वसीम्नि आनेयाः। बालादित्यः पृष्ठतः भवत्सैन्यं च संमुखे नाशयेत्। पार्श्वभागेन आक्रामन्तं मिहिरकुलं मूले स्थितो भवान् नाशयेद् इति।

राजा—साधु मातृगुप्त साधु! साधु गोपितः मन्त्रः। वेताल! कथं भवान् पश्यति?

वेतालः—देव ! शठे शाठ्यं समाचरेत् इति साधु चिन्तितं बालादित्येन। परं क्व तावद् दृष्टः मगधेश्वरः कालिदासेन ?

सूचकः—पाटलीपुत्रे ! हूणास्तु तस्याऽऽगमनं न स्याद् इति प्रयतन्ते।

वेतालः—अस्तु. साधय भूयः वृत्तसंग्रहाय।

सूचकः—तथा।

(प्रणम्य निष्क्रान्तः)

राजा—यदि एवं त्वरितम् आदेष्टव्यः सेनापतिः प्रयाणाय।

वेतालः—अथ किम्। अथवा मौहूर्त्तिकः प्रष्टव्यः विजययात्रायै।

(प्रविश्य)

प्रतीहारः—विजयतां देव आर्यश्च।

राजा—(सहर्षम्) गृहीतः जयशब्दः।

प्रतीहारः—देव, कश्चन दैवज्ञः दर्शनार्थी द्वारि तिष्ठति। आवेदयति, निष्णातः अहं त्रिस्कन्धे ज्योतिःशास्त्रे। देवम् अविलम्बम् द्रष्टुम् इच्छामि इति।

राजा—अवारितं प्रवेशय।

प्रतीहारः—तथा। (निष्क्रम्य पुनः दैवज्ञेन सह प्रविश्य) उपसर्पतु महाभागः।

(स्वयं निष्क्रान्तः)

दैवज्ञः—(दक्षिणं हस्तम् उद्यम्य) स्वस्ति भवद्भ्याम्।

राजा—

वेतालभट्टः—(आसनाद् उत्थाय) अभिवादये अत्रभवन्तम्।

दैवज्ञः—विजयी भूयाः।

राजा—भो आसनम् अत्रभवतः। (सेवकः आसनं प्रयच्छति) आसनं सनाथयतु भवान्।

दैवज्ञः—उपविशामि। भवन्तः अपि स्वं स्वम् आसनं गृह्णन्तु।

(सर्वे उपविशन्ति)

राजा—कुत इदानीं भवान् ?

दैवज्ञ—मौहूर्तिकः अहं तीर्थाटनप्रसङ्गेन महाकालदर्शनार्थं समागतः। ग्रह-स्थित्या दृष्टवान् अस्मि वैदेशिकैर् आक्रान्तृभिः सह महान् विग्रहः सन्निहितः। अभिजित् नामाऽयं मुहूर्तः शुक्रः च पृष्ठतः वर्तते। चन्द्रोऽपि सम्मुख इति विजययात्रायाः शोभनः कालः इति आवेदयितुम् अनाहूतः अपि स्वयम् उपस्थितः।

राजा—स्वागतम् अनामन्त्रितसङ्कल्पसिद्धेः। परं दैवज्ञ ! कथं भवन्तं व्यपदिशन्ति ?

दैवज्ञः—(सस्मितम्) वराहं मिहिर उदयमानः करोति इति व्यपदेश-मूलम्।

वेतालः—अहो ! भवान् न केवलं दैवज्ञः वक्रोक्ति-निपुणः अपि। (स्मृत्वा) आचार्यं वराहमिहिर ! अस्ति किमपि आवेदनीयम्।

वराह०—मम पुत्रस्य अनेकानि दिनानि व्याधि-ग्रस्तस्य। न च चिकित्स्य-मानः अपि वैरुज्यं गच्छति। अपि पश्यति भवान् रोगकारणं ज्योतिषदृशा।

वराह०—कथं न पश्यामः। तथाहि—

सुविचिन्त्य दशाभागं ग्रहाणां च बलाबले।
क्रियते प्राणिनामत्र सुखासुख-विनिर्णयः॥

राजा—सुयोगः खलु अयम्। विमृश्य अत्रभवता लघु भवान् आगच्छतु।

वेतालः—तथा। (आसनाद् उत्थाय) आचार्य ! आगम्यताम्। भवतः विश्रामादिसंविधानकम् अपि विधेयम्।

वराह०—(उत्थाय) स्वस्ति भवते। (वेतालेन सह निष्क्रान्तः।)

अपरः मन्त्री—पर्याकुलः तावद् आर्यवेतालः। इतो देशव्यसनम्, ततश्च तनयस्य मान्द्यम्। द्वैधे खलु भ्रमति मतिः।

राजा—अस्माकं राज्य-धुरन्धरः असौ। संकटसङ्कुरेऽपि नामुष्य मति-र्विमुह्यति।

मन्त्री—कः सन्देहः। तथापि प्रभवति पुत्रस्नेहः।

राजा—भवतु। विश्राम्यतु भवान्। अहं तावद् वेतालं प्रतीक्षे।

मन्त्री—(उत्थाय) यद् आदिशति देवः। (प्रणम्य गतः।)

राजा—(सचिन्तः परिक्रामन्) अयं भारतीयानां शौर्यस्य मालवानां च प्रतिष्ठायाः परीक्षाकालः । अस्मिन्नेव प्रदेशे एकदा सुगृहीतनामधेयेन विक्रमादित्येन शकानाम् उच्छेदः कृतोऽभूत् । इदानीं च हूणैः सह संघर्षः । एतेऽपि नितरां क्रूरा धूर्ताश्च । भगवन् महाकाल ! कुरु कृपां, धेहि मयि तेजः ।

(प्रविश्य)

वेतालः—सकृप एव मालवेश्वरे भगवान् महाकालः । अवश्यं हूणानाम् उन्मूलनस्य यशोभाजनं भविष्यति देवः ।

राजा—सत्या भवतु भवत आशंसा । किं तावद् आदिष्टं दैवज्ञेन ?

वेतालः—न किमपि, श्वः राजसभायाम् अन्यैः ज्योतिर्विद्भिः सह संमन्त्र्य निर्णयं करिष्यति ।

राजा—अहो ! महान् खलु कालातिपातः ! किं वत्सेन तावत् तथैव स्थातव्यम् ?

वेतालः—यादृशी भवितव्यता । को नाम दैवं प्रतिकूलयितुं क्षमः । किं तावद् निर्णीतं देवेन सैन्य-प्रस्थापन-विषये ?

राजा—नाऽस्ति तत्र विकल्पः । इदं तावद् विचारणीयं यत् सैन्येन सह कः सेनानीः प्रेषणीयः, सिंहगुप्तः अन्यो वा ।

वेतालः—तिष्ठतु तावत् प्रधानसेनापतिः सिंहगुप्तः । सिंहभद्र एव इदानीं किं न गच्छतु ?

राजा—सिंहभद्रः ? (सशिरःकम्पम्) बहुशः परीक्षितः सः । प्रतीक्षते च शौर्यप्रदर्शनस्य अवसरम् ।

वेतालः—अस्त्येव च कुमारामात्यः देवरातस्तत्र । एवं न किञ्चित् परिहास्यते ।

राजा—युक्तम् उक्तम् । कः कोऽत्र भोः !

(प्रविश्य)

प्रतीहारः—आज्ञापयतु देवः ।

राजा—सेनानीः सिंहभद्रस्तावद् आहूयताम्।

प्रतीहारः—यद् आज्ञापयति देवः। (निष्क्रान्तः)

राजा—कियत् सैन्यं पर्याप्तं भविष्यति ?

वेतालः—दशसहस्राणि सैनिकानां देवराताधीनानि। अतः दशसाहस्री सादिनां प्रेषणीया।

राजा—शत्रुबलस्य परिमाणं ततोऽधिकं भवति चेत् ?

वेतालः—चरेभ्यो ज्ञातं यथा तोरमाणेन सह पञ्चदशसहस्रप्रायं शक्तं सादिबलं वर्तते। विंशतिसहस्राणि च अन्यविधस्य।

राजा—एवं संपिण्डितं सद् अस्माकं संमिलितायाः सेनाया अधिकतरं प्रबलतरं च भवति।

वेतालः—अतएव नीतिर् अत्राश्रयणीया। इतः प्रस्थापिता दशसाहस्री सीमप्रदेशाद् दूर एव तिष्ठतु अभ्यासाविव्याजेन। देवरातः केनाऽपि व्यपदेशेन हूणैः सह विगृह्य भयापदेशेन तान् स्वसीम्नि आकर्षतु। पृष्ठतः बालादित्य इतश्च सिंहभद्रः सहसा देवरातेन संयुज्य तान् नाशयताम्।

राजा—साधु वेताल साधु।

(प्रविश्य)

प्रतीहारः—देव, सेनानीर् आर्यः सिंहभद्रः द्वारि स्थित आदेशं प्रतीक्षते।

राजा—त्वरितं प्रवेशय।

प्रतीहारः—तथा। (निष्क्रम्य पुनः सिंहभद्रेण सह प्रविश्य) इत इत आर्यः। एष देवः प्रधानमन्त्रिणा सह किमपि मन्त्रयमाण आस्ते। (निष्क्रान्तः)

सिंहभद्रः—(उपसृत्य) जयतु देवः।

राजा—सिंहभद्र ! अपि सज्जानि सैन्यानि ?

सिंहभद्रः—देव ! अहोरात्रं सज्जानि केवलं देवादेशं प्रतीक्षन्ते।

राजा—भवतु। (संज्ञया वेतालं निर्दिशति। वेतालः सिंहभद्रस्य कर्णे किमपि कथयति।) एवमिव।

सिंहभद्रः—एष कृतो देवादेशः। (प्रणम्य निष्क्रान्तः)

राजा—एवं तु उभयतः पिष्यमाणं हूणसैन्यं सर्वथा विनाशम् एष्यति।

वेतालः—मिहिरकुले आगते सति सोऽपि तस्याम् एव दिशि प्रेरणीयः।

राजा—अस्तु, युद्धक्षेत्रस्य प्रत्यग्रसूचनाहराश्चरा अपि अनुपदं प्रेषणीयाः।

(सहसा नेपथ्ये रणभेरीशब्देन सह सैन्यस्य समूहगानं श्रूयते। राजा वेतालश्च आकर्णयतः।)

एहि शूरवीर हे! सङ्कटेषु धीर हे!
एधि मातृभूमये स्व-सर्वदान-धीरहे!
साहसं तु जीवनं प्राणनं न जीवनम्।
लोलवीचिदंध्वनद् वारि रे नदी-वनम्।
धेहि पादमग्र एव दीनता-समीर हे!
एहि शूरवीर हे!.........
मृत्युतोऽपि किं भयं यस्य चाऽऽनतिः स्वयम्?
तं निमन्त्र्य साहसेन याहि दुर्लभं जयम्।
गीतयाऽपि किं न तया शिक्षितोऽसि कीर हे!
एहि शूरवीर हे!
दास्य-जीवनेन किम्? तस्य वैभवेन किम्?
कोकिलस्य वागुरा-वृतेन नन्दनेन किम्?
तत् स्वतन्त्रता-कृते प्रसर्प मुक्तभीरहे!
एहि शूरवीर हे!
यौवने चकाधि रे! क्लीबतां च शाधि रे!
मुञ्च भीतिमङ्ग! दर्पकण्टकं प्रशाधि रे!
कुण्ठय स्वसाहसेन वैरिवाहिनीरये!
एहि शूरवीर हे! सङ्कटेषु धीर हे!
एधि मातृभूमये स्वसर्वदानधीर हे!

राजा—गताः सिंहभद्रेण सह सैनिकाः । आवाम् अपि अन्यत् करणीयम् अनुतिष्ठाव ।

(निष्क्रान्तौ)

[जवनिकापातः]

द्वितीयोऽङ्कः

द्वितीयं दृश्यम्

(स्थानं—तोरमाणस्य हूणपतेः सभामण्डपः । उच्चासने हूणाधिपः तिष्ठति, परितः अन्तिप्रभृतयः । एका तरुणी करेण मदिराभाजनं चषकं च दधाना पुरतः स्थिता । तोरमाणः घूर्णितनयनः अर्धक्षीब इव दृश्यते ।)

तोरमाणः—(स्मयमानः) रश्मिमयि ! किम् अद्य कण्ठम् एव तरलयसि न श्रवणौ । कीदृशः अयं रोषः ?

तरुणी—(साभिवादनं सविलासं च चषकं पानेन पूरयन्ती) स्वामिन्, मया भवान् तृषित इव लक्षित इति पानम् एव उपहृतम् ।

तोरमाणः—(स्खलिताक्षरम्) आम् आम् । ननु करेण पानं स्वरेण च गानम् इति उभाभ्यां तर्पय ।

तरुणी—यथा आज्ञापयति स्वामी । (वादकान् संज्ञाप्य आलापयति ।)

प्राण ! मम किमसि प्रतीपः ?
जीवनं त्वदधीनमयि ! मे त्वयि हितः प्रेमा प्रदीपः ।
श्वासरथमारुह्य त्वामसवो विचेतुं किं न याताः ।
कर्मणीह सधर्मिणी तेषामियं रजनी च जाता ।
भावनाऽऽह, क्व मार्गयसि तं यो भवति तव हृत्समीपः ।
प्राण ! मम किमसि प्रतीपः ।
इन्द्रियैः पुरतो हितेन हृदाऽर्चितः सरति त्वमेकः ।
तारिकायां भुवनमोहन ! बिम्बितो लोके त्वमेकः ।
अश्रु सलिलैरदय ! परितस्तां त्वया रचितोऽन्तरीपः ।
प्राण ! मम किमसि प्रतीपः । प्राण ! मम ......

(शनैः शनैर्विरमति)

तोरमाणः—(घूर्णित-मस्तकः) साधु ! साधु ! (हस्तात् कङ्कणम् आकृष्य) गृहाण इदम् ।

तरुणी—(गृहीत्वा) अनुगृहीताऽस्मि । जयतु स्वामी ।

(अभिवाद्य पानपात्रादिना सह अपसरति)

तोरमाणः—(मन्त्रिणं प्रति) रोमक ! का प्रवृत्तिः मालवस्य ?

रोमकः—(उत्थाय) स्वामिन् ! सन्नह्यति मालवेशः आक्रमणं च प्रतीक्षते। तस्य सहायः मगधेश्वरश्च सोमनाथदर्शनप्रसङ्गेन राजधान्याः प्रचलित इति श्रूयते ।

तोरमाणः—अथ कालकेतोः का वार्ता ?

रोमकः—निगृहीतः सपरिजनः ।

तोरमाणः—(भृकुटिं बद्ध्वा) किं निगृहीतः ? कथं ज्ञायते ।

रोमकः—सुरक्षार्थं पलायितेन चरेणैकेन सूचितम् ।

तोरमाणः—(सावेशम् आसनाद् उत्तिष्ठन्) अथ केन एतत् कथितं बालादित्यः सोमनाथं प्रस्थितः ?

रोमकः—(सभयम्) तेनैव ।

तोरमाणः—(सचिन्तं परिक्रम्य) किं सत्यम् एतत् मन्यसे ?

रोमकः—हिन्दव एते प्रायः तीर्थेषु आहिण्डन्त एव इति किम् असत्यम् अत्र स्वामी पश्यति ?

तोरमाणः—(स्थित्वा तस्य मुखे दृष्टिं निक्षिप्य सोल्लुण्ठम्) ईदृशेषु अर्थशास्त्रिषु निहितभरः नियतम् अहं भारतं जेष्यामि ।

(रोमकः मुखं विनमय्य तूष्णीं तिष्ठति ।)

तोरमाणः—इदम् अपि युष्माकम् उपदेष्टव्यं यत् शिरसि आक्रमणे सन्निहिते को नाम पामरः तीर्थयात्रायै राज्यम् उपेक्षिष्यते ।

रोमकः—(शनैर्मुखम् उन्नमय्य) युक्तम् आह स्वामी । परं तीर्थयात्राया व्यपदेशोऽपि संभवति ।

तोरमाणः—(सोत्प्रासम्) किं मया अन्यत् पृष्टम् ? तीर्थयात्राया व्यपदेशः कौटिल्यं तस्य सूचयति ।

रोमकः—एवम् एतत् ।

(सहसा एकं बन्दीकृतं पुरुषम् आदाय)

राजभटः—जयतु स्वामी। (निर्दिश्य) अयं जनः सीम-प्रदेशे भ्रमन् दृष्टः निगृहीतश्च।

तोरमाणः—(सावेशम्) रोमक! पृच्छ्यतां कोऽयं मुमूर्षुः! न खलु शत्रोर्गुप्तचरः स्यात्।

रोमकः—(ताडयन्) कस्त्वं रे! कुत इहायातः।

पुरुषः—(उच्चैः कूजन्)

वाश्चारेड्ध्वजघग् धिग् धिग् धिग् जाल्मान् धरणीद्रुहः।
द्रोहिणो दहनाक्षणाशु दह दग्धाननानिमान्॥

तोरमाणः—किमयं ब्रवीति?

राजभटः—न बुध्यते किं ब्रूते। केवलं चीत्करोति। (भूयस्ताडयन्) कदर्य! किं न भणसि कः कुतो वाऽसि?

पुरुषः—   अवाचीपतिपूःपान्थानवाचीपतिदूतिका।
वाचीकूच्यकुचत्कूजा त्वरयत्वेव वोऽखिलान्॥

तोरमाणः—(सक्रोधम्) आः अपनयतैनं प्रलापिनम्। शुनोर्भक्ष्यं कुरुत।

(पुरुष उच्चैः क्रोशति)

(सभासदः सर्वे हसन्ति परं तोरमाणस्य मुखं वीक्ष्य सहसा तूष्णीं तिष्ठन्ति।)

रोमकः—(भटान् निर्भर्त्सयन्) कथम् एष उन्मत्तः अत्र सभायाम् आनीतः। निष्कासयत गलहस्तिकया।

पुरुषः—आ······आ······आ······(इति क्रोशन् भटैर् आकृष्यते)।

तोरमाणः—विडालाक्ष! अद्यैव आक्रम्यन्तां मालवाः। नाऽधुना विलम्बाऽवसरः।

विडालाक्षः—अथ कुमारस्य मिहिरकुलस्य विषये?

तोरमाणः—तस्य पार्श्वेऽद्यैव प्रहीयतां सन्देशः, शीघ्रं भूयसा बलेन उत्तरसीमानम् आक्रामतु इति। (रोमकाभिमुखं परिवर्त्य) यथादिष्टम् अनुष्ठीयताम्।

रोमकः—यद् आदिशति देवः। (निर्गच्छति)

(सहसा प्रविश्य)

पुरुषः—अनुष्ठितम् अनुष्ठितम् ।

तोरमाणः—आः किं कूजसि ? किम् अनुष्ठितम् ।

पुरुषः—(पादयोर्निपत्य) क्षाम्यतु भर्ता अस्माकं सीम्नि आक्रमणम् अनुष्ठितम् ।

तोरमाणः—(सक्रोधं पादं क्षिपन्) आः केन ?

पुरुषः—मालवसैनिकैः कलहव्यपदेशेन ।

तोरमाणः—भेकः सर्पस्य दंष्ट्रां स्पृशति ? (सेनापतिं प्रति) विडालाक्ष ! किं कुर्वन्ति युष्माकं सैनिकाः ?

विडालाक्षः—(सभयम्) भर्तः ! सज्जास्ते सीमानं रक्षितुम् । न खलु क्षुद्राः मालवा अदण्डिता यास्यन्ति ।

तोरमाणः—(क्रूरस्वरेण सरोषम्) केवलं दण्डिताः ? पश्य—

निस्त्रिंशश्यामधारासलिलकणशुचीन् वृक्णमूर्धोरुबाहून्
उत्क्षिप्योत्क्षिप्य दिग्भ्यः क्षपितरिपुशवान् आशु कृत्तोपहारान् ।
अन्त्रस्रग्भूषितांसो विलुठदरिशिरःकन्दुकैः क्रीडितोऽह
हाहाकारप्रणादप्रवणनृपगणान् मालवानद्य कुर्वे ।।

तदागच्छत, साधयाम रणस्थलम् ।

(निष्क्रान्ताः)

[जवनिकापातः]

द्वितीयोऽङ्कः

तृतीयं दृश्यम्

(स्थानं—श्रीनगर्यां राजप्रासादः । ततः प्रविशति सुराकलशहस्तया वारवनितयाऽनुगम्यमानः मिहिरकुलः ।)

मिहिरकुलः—अहो, अवितथम् उक्तं जनैः काश्मीरदेशः भूमिस्थितः स्वर्ग इति । कुतः—

सन्तापस्य कथा न, वीक्ष्य प्रकृतिं न क्षुत्तृषोरुद्यमः
पुष्पाणां प्रकरे छविः षड्ऋतुभूरालोक्यते नित्यदा ।
मूर्तेवाऽत्र कणे कणे विलसति श्रीरुर्वशीसंनिभा
एता अप्सरसो हरन्ति सहसा चेतो निमेषं दृशोः ।।

वारवनिता—सत्यमाह स्वामी ।

अमृतमिह निपीयते सतृष्णैर्दिशि दिशि पल्लविताऽथ नन्दनश्रीः।
त्वमिह विबुधवन्द्यपादपद्मो विलससि हेमकिरीटभाल इन्द्रः ॥

मिहिर०—(सस्मितम्) परमार्थतोऽहम् इन्द्रः यद् अविलङ्घितं भवतीनाम अप्सरसाम् अधरसुधामनिशं पिबामि ।

वारवनिता—(सकटाक्षमोक्षम्) तृषित इव लक्ष्यते स्वामी । (सुराकलशात् चषकम् आपूर्य प्रयच्छन्ती) अयं तावन्मादनो रसः ।

मिहिर०—(करेण गृह्णन्) अयि ! किं मोहयसि ? इतोऽपि मदिरतरे तव नयने । (सविलासं पिबति) ।

वारवनिता—(सहासम्) परं ते तृषं दीपयेते । (करात् रिक्तं चषकं गृह्णाति) ।

मिहिर०—(सम्मुखेऽवलोक्य) मोहिनि ! पश्य पश्य !

मरकतरुचिरम्ये शाद्वलाङ्के शयाना
विकचकुसुमचित्रां चारुभूषां दधाना ।
चलितसिचयलक्ष्यां गूहमानाङ्गयष्टिं
विटपिवरमुपेत्य श्लिष्यतीयं सुवल्ली ॥

वारवनिता—(सस्मितम्) सत्यम् उपलक्षितं देवेन । परं धर्मासनम् अध्यासितुं काल एषः ।

मिहिरकुलः—(स्मृत्वा) युक्तमाह मोहिनी । कालातिपातः न मयोपलक्षितः । तद् आस्थानमण्डपम् एव गच्छावः ।

(परिक्रामतः)

[पटपरिवर्तनम्]

(मिहिरकुलस्य सभाभवनम् । उभौ सभामण्डपं प्रविशतः । सर्वेऽपि ससम्भ्रमम् उत्तिष्ठन्ति । मिहिरकुलः सिंहासनम् अधितिष्ठति । वारवनिता अन्यत उपविशति । मन्त्रिगः समासदश्च परितः स्थिताः ।)

मिहिरकुलः—(मन्त्रिणं प्रति) कराल !

करालः—स्वामिन् ! क आदेशः ।

मिहिरकुलः—अपि समाप्तः करसङ्ग्रहः ?

करालः—स्वामिन् ! यथाशक्ति अनुष्ठितः ।

मिहिरकुलः—(अक्षिणी परिवर्त्य) कः अभिप्रायः ?

करालः—प्रजाभ्यः यावल् लब्धम्, तावद् धनम् अस्माभिर् आहृतम् ।

मिहिरकुलः—किं पूर्णःकर आहृतः ?

करालः—नहि तावत् ।

मिहिर०—(कठोरस्वरेण) कथं न ?

करालः—नाऽस्ति तासां सकाशे किमपि यद् गृह्येत ।

मिहिर०—धूर्ताः खलु जनाः । गृहतले निक्षिप्तं भवेत् ।

करालः—(सविनयम्) गृहाः तेषाम् उत्खानिताः । न च तत्र वराटिकाऽपि लब्धा ।

मिहिर०—तर्हि तेषां शरीरं विक्रीय करः सङ्ग्राह्यः ।

करालः—भर्तः, न कोऽपि कश्चित् क्रेतुम् उत्सहते ।

(सहसा प्रविश्य)

ब्राह्मणः—अब्रह्मण्यम् अब्रह्मण्यम् ।

मिहिरकुलः—आः ! कीदृशः कोलाहलः ?

ब्राह्मणः—त्रायतां त्रायतां महाराजः ।

मिहिर०—कोऽसि रे ! किमर्थं काकायसे ?

ब्राह्मणः—अनेन राजसेवकेन मम कन्या बलाद् दूषिता ।

मिहिर०—(साट्टहासम्) तर्हि को दोषः ?

ब्राह्मणः—(सविस्मयम्) किम् उच्यते को दोषः ?

मिहिर०—(साक्षेपम्) आम् । पश्य ! नरदेवा वयम् युष्मन्मतेन । देवश्च सर्वस्वोपहारम् अर्हति । यदि देवेन स्वयम् उपहारः गृहीतः कोऽत्र दोषः ।

(सर्वे हसन्ति)

ब्राह्मणः—(सक्रोधम्) यूयम् अपि देवपदम् अर्हथ ? राक्षसा अपि कदाचित् पूजाम् अर्हन्ति ! मानवाकारा वृकाः !

मिहिर०—(सभर्त्सनम् मध्ये आक्षिप्य) आः नरकीट ! तूष्णीं भव । अन्यथा जिह्वाम् ते आकर्षयिष्यामि ।

ब्राह्मणः—आः नरपिशाच ! राजराक्षस ! हूणापसद ! (हस्तौ प्रसार्य)
सज्जोऽस्मि सोढुं सकला अपि यातनाः । परं स्मर तावत् ।

कदाचार ! कृतैरेभिः कुत्सितैः कर्मभिर्लघु ।
धूलिसाद् भविता त्वं रे ! सकुलः कुलपांसन ॥

मिहिर०—(साट्टहासम्) अहह ! यत्सत्यं शापेनानेन भायितोऽस्मि । अरे मूढ !

स्त्रीणामिव प्रलापैर्वो यदि राजा विनश्यति ।
नियतं वायसाक्रोशैर्निःशेषाः पशवो भुवः ॥

ब्राह्मणः—विकत्थस्व विकत्थस्व यावत् प्रभवसि । दुःखितानाम् अश्रूणि तु त्वां निमज्जयिष्यन्त्येव ।

मिहिर०—(सक्रोधम्) आः अतिमात्रं प्रगल्भसे । (भटान् प्रति) किं पश्यथ अपनयतैनं कटुप्रलापिनम्. चित्रवधेन भूतबलिं कुरुत ।

(भटाः ब्राह्मणं बलाद् आकर्षन्ति)

ब्राह्मणः—(मुष्टिके दर्शयन्)

काक ! मत्कुण ! निर्बीज ! सालावृक ! कदाशय ! ।
स्वकृतैरेव मासेन सह वंश्यैर्विनङ्क्ष्यसि ॥

(भटैर्नीतः)

मिहिर०—गतोऽयं ब्राह्मणपशुः । कराल ! अथ क्वाऽसौ क्षपणकाऽधमः ?

करालः—पलायितः कश्मीरान् परित्यज्य ।

मिहिर०—(सक्रोधम्) किम् उक्तम् ? पलायितः ?

करालः—अथ किम् ?

मिहिर०—निर्दह्यन्तां सर्वेऽपि जैनोपाश्रयाः । अथ ज्ञातं क्व गतोऽसौ श्रमणापसदः ?

करालः—चरैः सूचितं यत् मालवान् गतो यशोधर्मसमीपे ।

(मिहिरकुल एतद् श्रुत्वा आसनाद् अवतीर्य किमपि चिन्तयन् परिक्रामति)

मिहिर०—(परिवृत्य) किं प्रयोजनं यशोधर्मणः समीपे गमनस्य ?

करालः—किम् अन्यत् ? कवयः संन्यासिनोऽलसास्तस्याश्रये तिष्ठन्ति, सोऽपि तैः समवेतः ।

मिहिर०—(किञ्चित् क्षुब्ध इव) यूयं न किमपि गाम्भीर्येण चिन्तयथ। पश्य-

दण्डे सत्यपि कठिनेऽनिशमकरोद् यः प्रजागरं नोऽत्र।
सकथं रिपुसविधे सन् स्थास्यति तूष्णीमकर्मण्यः॥

करालः—अस्ति एवम्। परं किम् अस्मान् विप्रकर्तुं क्षमः यशोधर्मा? महाराजात् तोरमाणाद् भीतः नाऽसौ पदमपि चालयितुं क्षमः।

प्रतीहारः—(प्रविश्य) विजयतां भर्ता। मध्यदेशात् सन्देशहरः प्राप्तः।

मिहिर०—तातपादानां सकाशाद् आगतः स्यात्। (प्रतीहारं प्रति) त्वरितं प्रवेशय।

(ततः प्रविशति सन्देशहरः)

सन्देश०—जयतु कुमारः।

मिहिर०—(दृष्ट्वा) अये, तातस्य विश्वासभाजनं कङ्खणः! भद्र! स्वागतम्। कथय, अपि अनामयं तातस्य?

सन्देश०—अथ किम्। कुमारम् अनामयं पृष्ट्वा सन्देशः प्रहितो भर्त्रा। (परितो निरीक्षते)।

मिहिर०—निभृतं श्रवणीय इति मन्ये। (परिवृत्य) करालवर्जं सर्वे दूरम् अपसरन्तु।

(सर्वे बहिर्गच्छन्ति)

अधुना विस्रब्धं कथय।

सन्देशहरः—शृणोतु कुमारः। भर्त्रा मालवा आक्रान्ताः। प्रवृत्तञ्च भीषणं युद्धं मालव-सीम्नि।

मिहिर०—(सावेशम्) किम् एकाकी यशोधर्मा अभियुज्यते उत अन्योऽपि कश्चन तस्य सहायः।

सन्देश०—सन्ति गोपाद्रिपतिप्रमुखास्तस्य सपक्षाः। परं मगधपतिर्नरसिंह-बालादित्यस्तेषाम् अग्रणीः।

मिहिर०—तर्हि क आदेशः तातस्य।

सन्देश०—क्षिप्रम् एव मालवानाम् उत्तरसीम्नि निभृतम् आक्रमणं विधेयम् इति। गोपनीयतया सन्देशस्य वाचिक एवाऽयं मन्मुखेन प्रहितः।

मिहिर०—अस्तु। विश्रम्यताम् इदानीम्। क्रिया एवात्र साधिष्ठं प्रतिवचनम्।

सन्देश०—तथा। (प्रणम्य निष्क्रान्तः)

मिहिर०—कराल ! किम् अत्र करणीयं मन्यसे ?

करालः—भवान् प्रच्छन्नवेषः कतिपयैर् अश्वारोहैः सह दशपुरदिशि आशु प्रतिष्ठताम्। सैन्यं च पश्चाद् अनेकधा विभज्य अभ्यासव्यपदेशेन विभिन्नदिक्षु यातु। तस्यैको भागः प्रत्यक्षविग्रहे दशपुरदुर्गपालम् आह्वयेत। अपरश्च रात्रौ प्राचीरम् आरुह्य निभृतं दुर्गे प्रविशेत्। एवं सुखेन दुर्गं हस्तगतं भविष्यति।

मिहिर०—(सप्रसादम्) साधु ! कराल ! साधु ! एवं कृते मालवाः क्षिप्रं वशे भविष्यन्ति। अथवा सकलम् एव भारतं पदतले निश्चितम्। परं सर्वथा गोपनीयोऽयं मन्त्रः।

करालः—अलं शङ्कया। न सहसा जनेन भवतोऽनुपस्थितिर्ज्ञास्यते।

मिहिर०—नियतम् अधुना तातप्रसादेन—

काश्मीरे मुग्धकान्तापृथुजघनतले खेलितो, गुर्जरीणां
श्रोणीविम्बे च भास्वद्-रथचरणनिभे यावदिच्छं विहृत्य।
राजस्थानाङ्गनानां नयनजलकणैः स्नातवान् मालवीनां
सद्यस्तुङ्गैरुरोजैर् हृदयभवमहं साधु संतर्पयिष्ये॥

(साटोपं निष्क्रान्तौ)

[जवनिकापातः]

तृतीयोऽङ्कः

प्रथमं दृश्यम्

(राज्ञः यशोधर्मणः सभाभवनम्। राजा वेतालभट्टः च विषण्णमुद्रायां तिष्ठतः। अपरः मन्त्री च समीपे स्थितः।)

मन्त्री—महाराजः अद्य नितराम् उद्विग्न इव लक्ष्यते।

राजा—मन्त्रिन् ! सत्यम् उपलक्षितं भवता। प्रधानामात्यस्य पुत्रः तथा चिकित्स्यमानः अपि नैव स्वास्थ्यं लभते।

वेतालभट्टः—तस्य वैदेशिकस्य भिषजः अनुसन्धानाय घोषणाऽपि कारिता पटहनादेन । परं न सोऽपि आसादितः ।

(सहसा प्रविश्य)

सञ्जीवकः—देव ! आसादितः ।

राजा—अयि कः ?

सञ्जीवकः—जयतु देवः महानात्यश्च । स वैदेशिकः वैद्यः ।

राजा वेतालभट्टश्च—(युगपत् सहर्षम्) अपि सत्यम् ?

सञ्जीवकः—देवपादानाम् अग्रे किम् अनृतम् अभिधीयते ?

राजा—अथ क्वाऽसौ ?

सञ्जीवकः—बहिः कक्षे विश्राम्यति ।

वेतालभट्टः—अथ स ज्योतिर्विद् ?

सञ्जीवकः—तम् अपि अतिथिशालाया आनयामि ।

(गन्तुम् इच्छति)

वेतालः—तिष्ठ तावत् । गृहात् वत्सस्य जन्मपत्रम् अपि आनीयताम् ।

सञ्जीवकः—तथा । (निष्क्रान्तः) ।

राजा—अप्येष भिषक् क्षमो भवेत् तं विरुजं कर्तुम् ।

वेतालः—दृश्यते, किम् एष करोति ।

(प्रविश्य)

प्रतीहारः—देव ! सञ्जीवकेन सहानीतः भिषग् द्वारि अस्ति ।

राजा—अविलम्बितं प्रवेशय ।

(ततः प्रविशति गृहीत-पेटिकः वैद्यः)

वैद्यः—स्वस्ति अत्रभवद्भ्याम् ।

राजा—स्वागतं वैद्यप्रवराय । (आसनं निर्दिश्य) आसनम् इदं गृह्यताम् ।

(वैद्यः नाट्येन उपविशति)

वेतालः—वैद्यराज, कुतो भवान् ?

वैद्यः—महामात्य, काशिकोऽस्मि । अत्रभवतः मालवनरेशस्य यशोगाथाः श्रावं श्रावं तद्दर्शनाभिलाषेण उज्जयिनीं समागतः ।

राजा—वैद्यराज ! केन नाम्ना भवन्तम् अवगच्छन्ति ?

वैद्यः—नाम तु प्रभोर्भवति, इत्येव वक्तव्यम्—

अधिधन्वन्तरिस्तर्तुं जातु न प्रभवत्यहो !
गुणिनामाश्रयेणाऽस्मिन्नपि प्रोत्साल्यते रसः ॥

वेतालः—अहो ! वक्रोक्तिनिपुणता अत्रभवतः । धन्वन्तरिः नाम्नाऽहं मृतेषु अपि प्राण-सञ्चारणे शक्त इति स्व-सामर्थ्यम् अपि सूचितम् ।

राजा—कृतार्थाः खलु भवत आगमनेन ।

(सहसा प्रविश्य)

सञ्जीवकः—जयतु भर्ता । अयम् आचार्यो वराहमिहिरः समायाति । इदं च कुमारस्य जन्मपत्रम् ।

(समर्प्य गच्छति । वराहमिहिरः प्रविशति, सर्वे तं दृष्ट्वा ससम्भ्रमम् उत्तिष्ठन्ति ।

वराहमिहिरः—(राजानं मन्त्रिणं च प्रति दक्षिणं हस्तम् उद्यम्य) स्वस्ति भवद्भ्याम् ।

राजा वेतालश्च—अभिवादये अत्रभवन्तम् ।

वराहमिहिरः—शुभं भूयात् ।

राजा—(आसनं निर्दिश्य) आसन-परिग्रहं करोतु भवान् ।

वराहमिहिरः—गृह्णामि आसनम् । भवन्तः अपि भजन्तु स्वं स्वम् आसनम् ।

(इत्युक्त्वा उपविशति । सर्वे तम् अनु उपविशन्ति ।)

मन्त्री—(धन्वन्तरिम् उद्दिश्य) वैद्यराज ! अयं ज्योतिर्विद् प्रधानामात्यपुत्रस्य रोगकारणं ग्रहदशाऽऽदेशद्वारेण परीक्षितुं प्रार्थितः । कथम् अत्र-भवान् मन्यते ?

धन्वन्तरिः—(सस्मितम्) श्रीमन् ! कथं नाम अहम् अन्यथा संश्ये ? पश्य ।

प्रद्वेषो बहुमानो वा स्वार्थभङ्गेन जायते ।
अनन्यकार्यदर्शित्वात् सौकर्यं मम साध्यते ॥

वेतालभट्टः—धन्यो भवान् । (वराहमिहिरं प्रति) आचार्य ! इदं मम वत्सस्य जन्मपत्रम् । तद् इदं विलोक्य तस्य रोगकारणम् निश्चिनोतु भवान् ।

वराहमिहिरः—साधु चिन्तितं भवता। कर्मफलमूला हि रोगाः। (जन्मपत्रं गृहीत्वा निपुणं पश्यति। मनसि किमपि चिन्तयन् शिरश्चालयति। पुनः प्रकाशम्) महामात्य! अस्मिन् शुक्रो भूमिसुतश्च लग्नात् सप्तमभावे स्थितौ पापग्रहेक्षितौ च । शनैश्चरस्य दशायां केतोरन्तर्दशा, वातरोगश्च तस्याः फलम् । तथाहि—

पापालोकितयोः सितावनिजयोरस्तस्थयोर्वातरुक् ।

इति । अतः चिकित्सया सार्धं ग्रहाणां जपदानाद्यपि नितराम् आवश्यकम् ।

वेतालः—आचार्यस्तावद् एवं कथयति । अथ धन्वन्तरिमहाभागस्य किं मतम् ?

धन्वन्तरिः—महामात्य, आयुर्वेदानुसारेण रोगिपरीक्षया एव रोगनिश्चयः क्रियते । न च मया तस्या अवसरः अद्यावधि लब्धः । एवं स्थिते किं कथयामि ?

राजा—युक्तम् उक्तं भिषग्वरेण । रोगि-समीपे नीयतां सः ।

वेतालः—प्रथमः कल्पः । तर्हि तत्रैव गच्छामः । (आसनाद् उत्थातुम् इच्छति ।)

(सहसा प्रविश्य)

प्रतीहारः—जयतु देवः । आर्यः नागसेनः द्वारि तिष्ठति । अविलम्बितं च दर्शनम् इच्छति ।

राजा—नागसेनः ? (वेतालाभिमुखं पश्यन्) नागसेनस्तु भद्रबाहुणा सह उत्तरसीमानं रक्षितुं प्रेषित आसीत् । (प्रतीहारं प्रति) प्रवेशय तम् ।

प्रतीहारः—तथा । (निष्क्रान्तः) ।

वेतालः—(एकं सेवकं सङ्केतेन आहूय) भिषग्वरं धन्वन्तरिम् अस्मद्-गृहं नीत्वा तस्मै रुग्णं दर्शय ।

सेवकः—यथा आज्ञापयति अमात्यः । (धन्वन्तरिणा सह निष्क्रान्तः ।)

राजा—(ज्योतिर्विदम् अन्यांश्च सभासदो दृष्ट्वा) अपेक्षितं दानादि श्वः सङ्क्रान्तौ विधास्यते । सम्प्रति विश्राम्यन्तु भवन्तः ।

सर्वे—तथा। (वराहमिहिरेण सह निष्क्रान्ताः। अन्यतः प्रविशति नागसेनः)

नागसेनः—(प्रणम्य) जयतु देवः। जयतु अमात्यः।

राजा—नागसेन, कथय। न खलु किमपि अत्याहितम्?

नागसेनः—(सर्वतः विलोक्य) देव, अत्याहितम् एव।

राजा—(सावेगम्) न खलु दशपुरदुर्गं परैर्विजितम्?

नागसेनः—न विजितम्। परं मिहिरकुलाधिष्ठितेन सैन्येन रात्रौ प्राकारम् आरुह्य आक्रान्तम्।

वेतालः—प्राकारम् आरुह्य? अथ प्रहरिणः?

नागसेनः—अमात्य! तैर् एव रक्षितं दुर्गम्। दृष्टमात्राः शत्रवः तैर् अभियुक्ताः। तस्मिन् कोलाहले च दुर्गस्था अधिकारिणः सावधाना जाताः। एवं विफलीकृतो वैरिणां यत्नः।

राजा—हुम्, अधुना का स्थितिः?

नागसेनः—भद्रबाहुः प्राणपणेन प्रत्यर्थिनः परासितुं युध्यते। आटविकं सैन्यं दुर्गं रक्षति।

वेतालः—परम् अस्माकं चराः किं स्वपन्ति? कथं न ज्ञातस्तै रिपूणाम् अभिसन्धिः।

नागसेनः—अमात्य, कुटिलैः शत्रुभिस्ते वञ्चिताः। तेषां सैन्यस्यैकेन भागेन पूर्वं सम्मुखयुद्धम् उपक्रान्तम्।

राजा—छद्मयोधिन इमे जाल्माः। (सचिन्तं परिक्रम्य) भवान् तर्हि किं निमित्तं समागतः?

नागसेनः—भद्रबाहुनाऽहं सैन्यसाहाय्यापेक्षया देवस्य पादमूलं प्रेषितः।

वेतालः—किं परिमाणं शत्रुबलस्य।

नागसेनः—त्रिंशत्-सहस्रप्रायम्। अस्मदीयं च आटविकेन सम्मेल्य विंशति-सहस्रमात्रं स्यात्। तस्य च चतुर्षु भागेषु एकः दुर्गरक्षार्थं नियुक्तः। द्वौ च सीम्नः अन्यगुल्मेषु सैनिकसंख्यावृद्धये प्रेषितौ। एवं पञ्च-सहस्रमात्रं बलं शिष्यते।

राजा—(सावेशम्) वेताल! नाऽधुना समयः मन्त्रस्य। अहम् अधुनैव गत्वा हूणान् उन्मूलयामि।

वेतालभट्टः—देवः यदि माम् अनुजानाति, विज्ञापयामि किञ्चित् ।

राजा—(सावष्टम्भम्) किं वक्तुमिच्छति भवान् ?

वेतालभट्टः—कुटिलेषु कदर्येषु सन्नयो नैव सज्जते ।

शाठ्यं तु युज्यते तेषु कण्टके कण्टकं यथा ॥

राजा—(साकूतम्) कः भवतः अभिप्रायः ?

वेतालः—देव, एतद् अत्र युक्तम् । नागसेनः अद्य एव पञ्चसहस्राणि सादिनाम् आदाय वनमार्गेण प्रतिष्ठताम् । चरद्वारेण भद्रबाहुश्च सन्देष्टव्यः यथा शत्रुसैन्यं कारूरामिमुखं पराक्षिपेत् । नागसेनश्च पृष्ठतः आक्रम्य पीडयेत् ।

राजा—(साकूतम) ततः किम् स्यात् ?

वेतालः—मां च अनुजानातु देवः ।

राजा—किमर्थम् ?

वेतालः—अहं तावत् प्रधानबलम् आदाय मध्यतः मार्गम् आवृत्य स्थास्यामि ।

राजा—(वेतालं हस्ते गृहीत्वा) अलम् अतिसाहसेन । वत्से एवं स्थिते नाहं भवन्तम् अनुज्ञातुं शक्नोमि । भवान् नीतिज्ञः शूरः कृत्यविच् च । अतः मूलस्थानं रक्षन् यथावश्यकं सैन्यसङ्ग्रहं करिष्यति ।

वेतालः—(किञ्चिन् म्लान इव) यथा देव आदिशति । परं नागसेनस्य यात्राविषये कः निर्णयः ?

राजा—भवन्मन्त्रे कः विकल्पः ? (नागसेनं प्रति) भद्र, ब्रूहि अस्मद्-वचनात् सिंहगुप्तम् ।

नागसेनः—किमिति ?

राजा—सादिनां पञ्चसहस्रं त्वया सह यातु । मौलवर्जं शेषं सकलम् अपि चतुर्विधं सैन्यं च सन्नाहाय आदिश इति । घुष्यतां च नगरे—

प्राणा यस्य न जातु वल्लभतरा देशात्, न यो रक्षितुं
देहं कांक्षति गर्हितं सुयशसो लोपेऽपि कोपेऽपि च ।
मानो यस्य च जीवनादभिमतो यः पौरुषे नाऽरसः
सोऽयं मामनुगच्छतान्न तु जनः स्त्रैणोऽथवा कातरः ॥

नागसेनः—तथा ।

(निष्क्रान्तः)

राजा—(वेतालं हस्ते गृहीत्वा) सखे, शप्तोऽसि मम प्राणैः, वत्सस्य स्वास्थ्य-लाभाय न किमपि उपेक्षिष्यसे। अद्य इदं राज्यम्, इमाः प्रजाः, इदं कुलञ्च भवदधीनम्।

(सम्भ्रान्तः)

प्रतीहारः—जयतु भर्ता। जयतु अमात्यः। अयं कालिदासः सम्प्राप्तः।

राजा—कालिदासः? अपरं किमपि अत्याहितं श्रूयते इति प्रत्येमि।

वेतालः—किं प्रतीक्षसे? अविलम्बितं प्रवेशय।

(ततः प्रविशति कालिदासः)

कालिदासः—लोके मानधनानां शूराणां साहसैकरसिकानाम्।
कण्टककलितः पन्थाः सुमनोवीथीयते नित्यम्॥

अहो, मातृभूमिसेवाव्रतं महाराजस्य यशोधर्मणः। हूणैः विलश्यमानाया अस्या भुव उद्धाराय अहर्निशं यतमानस्य नाऽस्ति तस्य क्लेशलेशोऽपि। तस्य आदेशेन अहम् अपि बालादित्यमुखान् अनेकान् नरेशान् एकस्य ध्वजस्य तल आनेतुं प्रायतिषि फलितश्च मे यत्नः। अधुना सफलीभविष्यति तस्य महाराजस्य साधना। (विलोक्य) अयं महाराजस्तिष्ठति। (उपसृत्य) स्वस्ति भवते। स्वस्ति महामात्याय।

राजा—(दृष्ट्वा सहर्षम्) सखे मातृगुप्त! स्वागतम्। अपि सफलः भवतो यत्नः?

कालिदासः—अथ किम्। प्रस्थितः मगधेश्वरः। गोपाद्रिपतिप्रभृतयोऽपि संहिताः। परं पश्चिमक्षेत्रे हूणानां वेगः प्रबलः। अतः स्वपक्षस्य संवर्धनम् अपेक्ष्यते।

राजा—अलं चिन्तया। अहं प्रयाणाय सज्ज एव. मूलरक्षायै वेतालः केन्द्रे स्थास्यति। सैन्यसंग्रहे भवान् तस्य साहाय्यम् अनुतिष्ठतु।

कालिदासः—विज्वरः गच्छतु महाराजः। अहं स्ववाण्याः शङ्खनादेन एतस्य राष्ट्रस्य आबालवृद्धं जनान् तथा उद्योजयिष्यामि यथा एकः बालः अपि हूणानाम् उन्मूलनाय गृहीतशस्त्रो भविष्यति।

वेतालः—साधु कवे! पूरय तं शङ्खं यस्य स्वरेण वैरिणां हृदयानि भिद्येरन्, गाय तद् गीतं येन कर्णयोर्गुञ्जता मृता अपि सप्राणाः स्युः। तदा द्रक्ष्यामः को नाम वैदेशिकः रणमुखे अस्मत्-सम्मुखे तिष्ठति।

राजा—साधु वेताल ! साधु । (सगर्वं खड्गम् उत्तोल्य) अहमपि—

घावत्सादिपदातिपादपतनोद्भूतं रजोर्दुर्दिनं
द्विड्गैः षिड्गकदम्बिकुम्भिभिरिभैः संयम्य दानाम्बुभिः ।
क्षेप्यैः क्षपितद्विषड्गलबिलप्रस्नाविफेनोज्ज्वलाऽ
सृग्धारासलिलैः करोमि शमितोत्ताम्यत्तृषं कालिकाम् ॥

(सर्वे निष्क्रान्ताः)

[जवनिका-पातः]

तृतीयोऽङ्कः

द्वितीयं दृश्यम्

(ततः प्रविशति प्रस्थानोद्यतः पुरुषः)

पुरुषः—बत बत ! दास्याः पुत्रैरमीभिर्हूणैः पर्याकुलीकृताः स्मः । कश्मीरा एतैरुपद्रुता एवाऽऽसन् । अधुना मालवा अपि आक्रान्ताः । मालवेश्वरोऽपि तेषां प्रतिरोधाय निर्गतः । रात्रिदिनं च यामिका 'जाग्रत भो अप्रमत्ता भवत' इति घोषयन्तः निद्रां विद्रावयन्ति । प्रधानामात्येन तु अपर एव क्रम उपक्रान्तः । प्रतिदिनं समर्थान् जनान् सेनाप्रवेशाय प्रेरयितुं राजपुरुषा उपधावन्ति । परं को नाम स्वयं मृत्युमात्मन आमन्त्रयतु ? अतो यावत् न मम वारः समायाति, तावदेव दूरमपसरामि । (परिक्रामति) परं गमनात्पूर्वं मया प्रियसुहृत् चिबिल्लक आप्रष्टव्यः । यथास्थित एव तं पश्यामि । (गन्तुम् इच्छति । नेपथ्ये) भो अपि दृष्टः चर्पटकः भवद्भिः ? (श्रुत्वा) अयं तु चिबिल्लकस्येव स्वरसंयोगः प्रतीयते । भवतु, उपसर्पामि । (उपसृत्य) सखे चिबिल्लक ! अयम् अस्मि ।

(प्रविश्य)

चिबिल्लकः—हं हो चर्पटक ! अपि कुशलम् ? (निपुणं निरूप्य) त्वं तु क्वाऽपि जिगमिषुरिव लक्ष्यसे । किमेतत् ?

चर्पटकः—मित्र ! निर्विण्णोऽस्मि अनया युद्ध-स्थित्या । अतः क्वचिद् दूरे अपसर्तुमिच्छामि ।

चिबिल्लकः—मित्र ! खलु एवं चिन्तयित्वा । देशे सङ्कटग्रस्ते आत्मरक्षार्थं पलायसे ? प्राणपणेनाऽपि मातृभूमे रक्षा कर्तव्या ।

चर्पटकः – अपेहि रे देशरक्षाव्रतिन् ! न जानासि जीवन् नरो भद्रशतानि पश्येत् इति ।

चिबिल्लकः—(हस्ते गृहीत्वा) परं किं त्वम् एकाकी जीवित्वाऽपि करिष्यसि ? पश्य—

माता यस्य गृहे नाऽस्ति भार्या च प्रियवादिनी ।
अरण्यं तेन गन्तव्यं यथाऽरण्यं तथा गृहम् ।।

अत एहि, देशरक्षायै कथं न प्राणान् जुहवाव ?

चर्पटकः—(हस्ताभ्यां कर्णौ पिधाय) शान्तं पापम् । प्राणाः किम् ईदृशाः फलानि यान् स्वयं युद्धभूमिं गत्वा त्यजाव ।

चिबिल्लकः—अरे ! क्षत्रियास्तु तद् दिनम् उत्सुकाः प्रतीक्षन्ते यस्मिन् रण-महोत्सवे सोत्फालं कूर्दन्तः शत्रून् नाशयन्तश्च वीरगतिं लभेरन् ।

चर्पटकः—भो मत्संमुखे रणस्य नामाऽपि न चर्चितव्यम् । नाऽहं तत्र गमिष्यामि ।

चिबिल्लकः—(सहासम्) अहं तु त्वाम् एव नेतुं प्रेषितः मन्त्रिणा । (इति करे गृहीत्वा आकर्षति ।)

चर्पटकः—(सानुनयम्) मित्र ! मुञ्च माम् । अस्याः कथाया अपि बिभेमि । एष त्वां पादयोः पतित्वा प्रसादयामि ।

(इति पादौ स्प्रष्टुमिच्छति)

चिबिल्लकः—(मुक्त्वा) चित्रम् इदम् । यदा देशस्य कोणे कोणे बलिदानस्य गीतानि गीयन्ते, आबालवृद्धं जना आत्महोमाय संनह्यन्ति, त्वं कातरो भूत्वा आत्मरक्षायै पलायसे । आकर्णय तावत् । एते समवेता जनाः शत्रुनाशाय महाकालं प्रार्थयन्ति ।

(नेपथ्ये घण्टानादेन सह समवेतकण्ठस्वरः)

जय महाकाल ! जय महाकाल !
शङ्कर ! प्रलयङ्कर ! चन्द्रभाल !
रिपुसूदन ! दुर्धर-मदन-गर्व-खर्वण !
जनचर्वण खलकराल !
अरिमण्डलमयि कुरु खण्डखण्डमहिमण्डन !
मण्डित-मुण्डमाल !
जय महाकाल ! जय महाकाल !

चिबिल्लकः—अपि श्रुतम् ! कीदृशी व्यथा एतेषां जनानां हृदि मातृभूमेः सङ्कटम् अनुभूय !

चर्पटकः—मित्र ! इदं श्रुत्वा ममाऽपि भुजः स्फुरति शस्त्रग्रहाय । चरणः बलाद् अग्रे सरति ।

(भूयः श्रुतिम् अभिनीय स्वयम् अपि सहैव गायति)

मृत्युञ्जय जयजय देवदेव !
ताण्डव-मण्डन जय महादेव !
रिपु-भैरव ! भैरव-तनय ! केव
भारतभुवि विस्मृतिरखिलपाल !
जय महाकाल ! जय महाकाल !
भारतमव दुर्मदहूणदूनगौरवमयि पालय कालकाल !
उन्मीलय निटिलेक्षणमुदीर्णविकटानलमुत्कटकोपशाल !
जय महाकाल ! जय महाकाल !

चिबिल्लकः—गृहे गृहे महाराजस्य विजयाय हूणानां पराजयाय चेदृशी प्रार्थना प्रतिदिनं क्रियते जनैः । मातृगुप्तश्च विस्मृताहारादिक्रियः सर्वान् जनान् देशरक्षार्थं उद्योजयन् भ्रमति । सहस्रशः जनास्तस्याह्वानं श्रुत्वैव बद्धपरिकरा भवन्ति ।

चर्पटकः—(श्रुतिम् अभिनीय) मित्र ! कीदृशोऽयं डिण्डिमनादः ?

चिबिल्लकः—नोपलक्षितो मया । भवतु अधुना दत्तकर्णो भवामि ।

(तथा करोति । नेपथ्ये सहगानम्)

अमृतपुत्र हे जागृहि बन्धो ! सङ्कटेऽस्ति ते मातृमही ।
मुञ्च मोहमयि ! भासय ककुभः खड्गधारया युद्धमही ।।

अमी वैरिणः क्रूरा हूणा गृहद्वारि कथमानीताः ?
पराधीनतानरकाद् भ्रातर् वरं मृत्युरिति जानीथाः ।।

वेणुरागमयि विस्मर बन्धो ! दंध्वनीति यद् रणभेरी ।
छिन्धि भिन्धि जहि घातय ताडय गायतीति रे तव वैरी ।।

इष्टदेवता रुष्टा नूनं प्रसादयैतामुपचारैः ।
महाकालमयि मण्डय भूयो मुण्डमालिकानवहारैः ।।

जन्मभूमिबलिवेदी सज्जा प्रतीक्षते तव बलिदानम् ।
शिरः समर्पय यदि जानीषे स्वतन्त्रताया महिमानम् ॥
गृहाणाऽसिमयि ! खण्डय खण्डय शत्रुमण्डलं रणचण्डः ।
यशोराशिभिर्मण्डय मण्डय दिशो वैरिणां यमदण्डः ॥

चर्पटकः—अहो ! ओजस्विताऽस्य गानस्य ! मित्र चिबिल्लक ! सज्जोऽस्मि सर्वस्वदानाय । एहि सेनायां प्रवेशाय सैन्यकार्यालयं गच्छाव ।

(सहसा डिण्डिमघोषः श्रूयते)

चिबिल्लकः—तिष्ठ तावत् । काचित् नवा घोषणा क्रियते ।

(नेपथ्ये)

भो भो उज्जयिनीनागरिका दिष्ट्या विजयेन वर्धन्ते भवन्तः । महाकालप्रसादेन पुरुहूतप्रतापतापितसकलरिपुमण्डलः हूणबलजलधिमन्थन-मन्दरायमाणभुजदण्डः मालवमहीमण्डलाखण्डलः महामाहेश्वर महाराजाधिराजयशोधर्मदेवो रणभूमेः प्रतिनिवर्तते ।

उत्खाताः खलु मूलतोऽपि कुटिला हूणाः, स्वतन्त्राः कृताः
कश्मीरास्त्वरमाण उद्धुरमदः पुत्रैः समं नाशितः ।
बालादित्य उदीर्णशत्रुनिभृतः कूटग्रहान् मोचितः,
स्वाधीनं खलु भारतं नृपगुणैर्नित्योत्सवा मालवाः ॥

अस्मिन्नवसरे सर्वैर्नगरवासिभिर् ध्वजतोरणादियोजनया अभिनन्दनीयं महाराजस्य आगमनम् ।

चर्पटकः—(हर्षेण नृत्यन्) हंहो सम्प्रातो विजयी महाराजः । (चिबिल्लकम् आलिङ्ग्य) मित्र ! दिष्ट्या वर्धसे विजयोत्सवेन । एहि, आवामपि तोरणादिनिर्माणैः स्वगृहं प्रसाधयाव ।

(निष्क्रान्तौ)

[जवनिका-पातः]

तृतीयोऽङ्कः

तृतीयं दृश्यम्

(राजसभा-मण्डपम् । कालिदासप्रभृतयः विद्वांसः नैगमा अधिकारिणश्च स्वेस्वे स्थाने स्थिताः । सहसा तूर्यघोषेण सह 'विजयतां मालवेश्वरः, विजयतां हूणमृगपञ्चानन' इति घोषणा । तदैव वेताल-

भट्टेन, सेनापतिना सिंहगुप्तेन, भद्रबाहुणा अन्यैश्च सामन्तैः परिवृतः प्रविशति राजा। सर्वे स्वासनात् समुत्थिताः पुष्पाणि अवाकिरन्ति। राजा च सिंहासनसमीपं गत्वा स्थित एव अञ्जलिं बद्ध्वा सर्वेषाम् अभिनन्दनं स्वीकरोति। तस्मिन् उपविष्टे सर्वेऽपि उपविशन्ति।)

बन्दिनः— जय जय जय मालवेश !
खलरिपुदलदलनशौण्ड विक्रमरक्षितसुदेश ॥
प्रबलनृपतिवृन्दवन्द्य विविधगुणगणाभिनन्द्य ।
मुखरुचिजितपूर्णचन्द्र संस्तुतवरुणालकेश ॥
जय जय जय मालवेश !
भुजबलजितहूणभूपयोषाविहितान्वकूप !
बुधवरगणसरिदनूप वैभवतुलितामरेश ॥
जय जय जय मालवेश !
भुवनवियति संचकाधि युगशतमवनिं प्रशाधि ।
कुरु गुणि हृदयं गताधि तेजसि समविधुदिनेश '।
जय जय जय मालवेश !

वेतालभट्टः—(उत्थाय) उपस्थिता विद्वांसः, महाप्रभावा नृवरा, राज्याधिकारिणः, नैगमश्रेणयः अन्ये च उपस्थिता महानुभावाः स्वगुणगरिम्णा शौर्येण औदार्येण विद्याप्रेम्णा च जनहृदयानि नन्दयन्तं महाराजं 'विक्रमादित्य' इति गौरवमयेन उपाधिना अभिनन्दितुम् अभिलषन्ति। आशासते च यथा महाराजाधिराजः प्रजावत्सलत्वात् प्रजानाम् इमं कामम् अवश्यम् अनुमोदिष्यते।

(करतालिकाभिः स्वागतम्)

राजा—प्रियाः प्रजाजनाः, नाऽहं प्रभवामि भवताम् असाधारणं प्रेम प्रत्याख्यातुं यस्य बलेन महाकालस्य प्रसादेन च दस्यून् अमून् विनाशयितुं प्राभवम्। परं विक्रमादित्यस्य आदर्शान् पालयितुं प्रभविष्यामि इत्यत्र अस्ति मे सन्देहः।

(सर्वतः जयघोषः 'विजयतां महाराजाधिराजो विक्रमादित्यः, विजयतां मालवेश्वर' इति।

वेताल:—अद्य वयम् अनेकै: सङ्कटै: मुक्ता: । वैदेशिकेभ्य: भयं समाप्तिं गतम् । मदीय: बाल: वैद्यराजस्य धन्वन्तरे: प्रसादात् सर्वथा रोगमुक्त: सञ्जात इति च महतो हर्षस्य विषय: ।

क्षपणक:—वयं काश्मीरका विशेषेण कृतज्ञा महाराजस्य ये मिहिरकुलस्य अत्याचारेभ्यो मोचिता: ।

राजा—अस्मिन् विजये मगधेश्वर: बालादित्य: प्रधानहेतु: । स चात्र न सन्निहित: । अत: तदर्थं वर्धापनाय पुष्कलं प्राभृतकं प्रेषणीयम् ।

वेतालभट्ट:—यद् आदिशति महाराज: ।

सभाऽध्यक्ष:—अधुनाऽस्मिन् विजयोत्सवे गुणिन: पुरस्कारै: सम्मान्यन्ते । तत्र प्रथमं वैद्यराजाय धन्वन्तरये पूर्वप्रतिज्ञातं स्वर्णमुद्रासहस्रं प्रदीयते । महाराजस्य करकमलाभ्यां पुरस्कारं गृह्णातु ।

(धन्वन्तरि: राज्ञोऽभिमुखम् आगत्य स्वर्णमुद्रा: प्रावारकं च गृह्णाति ।)

इदं प्रावारकं सभारत्नत्वं सूचयति ।

(सर्वे करतालिकाभिरभिनन्दन्ति)

सभाऽध्यक्ष:—अस्मिन् सङ्कटकाले प्रधानमन्त्रिणा वेतालभट्टेन निरुपमा नयज्ञता, जागरूकता देशभक्तिश्च प्रकटिता: । अत्रभवता मातृगुप्तेन च दौत्येन, कोणेकोणे ग्रामंग्रामं देशरक्षायै जना उद्योजिता: । आचार्यवराहमिहिरेण स्वयम् आगत्य विजययात्रायै मुहूर्त उपदिष्ट: । वैद्यराजेन धन्वन्तरिणा न केवलं प्रधानमन्त्रिण: सुलश्चिकित्सित:,संग्राम-आहतानां व्रणबन्धादिविधानं च नैपुण्येन कृतम् । एते सर्वेऽपि परिषद: अस्या रत्नानि ।

(सर्वत: 'साधु साधु' इति कलकल:)

मन्त्री—अथ अन्ये कविपण्डिता: ?

सभाध्यक्ष:—कवि: क्षपणक: घटकर्परश्च, कोषकार: अमरसिंह:, आचार्य शङ्कु:, पण्डित: वररुचिश्चेति सर्वेऽपि राजसभाया रत्नानि घुष्यन्ते ।

सिंहगुप्त:—इयं नवरत्नमालिका नवग्रहीव विक्रमादित्यं भूषयति ।

सभाऽध्यक्ष:—अयं विजयोत्सव: महत आमोदस्य अवसर: । अत्र पुण्यपर्वणि आचार्यो वराहमिहिर: स्वकीयं प्रबन्धं बृहत्संहितां, मातृगुप्तकालिदास:

ज्यौतिषग्रन्थं ज्योतिर्विदाभरणम्, अमरसिंहः स्वं शब्दकोषं च विद्याकलासंरक्षकाय महाराजाधिराजाय समर्पयन्ति। प्रार्थयन्ते च अत्रभवन्तं स्वहस्ताक्षरैः प्रमाणीकरणाय।

(वराहमिहिरः, मातृगुप्तः अमरसिंहश्च क्रमश उत्थाय स्वं स्वं ग्रन्थं महाराजस्य सम्मुखे स्थापयन्ति। स चैकैकशो निभाल्य स्वहस्ताक्षरैः मुद्रयति।)

सभाऽध्यक्षः—अत्रभवान् मातृगुप्तः कालिदासोपाधिना शृङ्गारकविः इत्येव सर्वेषां विदितः। ज्यौतिषशास्त्रेऽपि स सरुचिः इति तु सर्वान् विस्माययत्येव।

राजा—किं नाम वश्यवाचां कवीनां परोक्षम्? सरसानि तु पद्यानि तस्य मुखात् शुश्रूषामः।

मातृगुप्तः—(उत्थाय) यथादेशं शृङ्गारतिलकात् पद्यद्वयं पठामि—

इन्दीवरेण नयनं मुखमम्बुजेन
कुन्देन दन्तमधरं नव-पल्लवेन।
अङ्गानि चम्पकदलैः स विधाय वेधाः
कान्ते! कथं घटितवानुपलेन चेतः॥

हे रोहिणि! त्वमसि रात्रिकरस्य भार्या,
एनं निवारय पतिं सखि! दुर्विनीतम्।
जालान्तरेण मम वासगृहं प्रविश्य
श्रोणीतटं स्पृशति किं कुलधर्म एषः?

(सर्वतः 'साधु कालिदास! सरस्वती-पुत्र! साधु' इति ध्वनिः। कालिदासः शिरोनमनेन साधुवादं गृहीत्वा स्वस्थाने उपविशति।)

सभाऽध्यक्षः—अधुना काश्मीरकः कविः क्षपणकः स्वकाव्यं प्रस्तौति।

क्षपणकः—(उत्थाय) श्रीमन्! महाकवौ कालिदासे स्थिते के वयं काव्यं पठितुम्? तथापि श्रीमताम् आदेशेन सुरभारत्या महत्त्वम् आश्रित्य गीतिम् एकां श्रावयामि—

तनुध्वं रतिं संस्कृते भारतीयाः!
विना संस्कृतं कीदृशा भारतीयाः? (ध्रुवपदम्)।

इयं देववाणी सुवाणी पुराणी
चिरं पूर्वजैर्नः सरागैरभाणि ।
उदासीनता तत्र वः कीदृशीयं
यया संस्कृतिः संस्कृतिर्भारतीया ॥
तनुध्वं रतिम् ... ...

यया वेदसन्देशसन्देशकर्म
सुसञ्चारितं धारितो वाऽपि धर्मः ।
पुनानां जगत् संश्रवेणाऽपि पुण्यां
न तां गर्हयन्तो हता भारतीयाः ?
तनुध्वं रतिम् ... ...

पुराव्यासवल्मीकभू-कालिदासैः
सभासैः श्रिता शारदाया विलासैः ।
शिवं शेवधिं पूर्वजानां निजानां
त्यजन्तो गिरं किं ध्रुवं भारतीयाः ? ॥
तनुध्वं रतिम् ... ...

विदेशेषु या शील्यते चीयते वा
कण्ठेहृत्य नित्यं बुधैः पीयते वा ।
रसालामिमां जीवनीं स्वादुबल्यां
न किं कुत्सयन्तो मृता भारतीयाः ?
तनुध्वं रतिम् ... ...

विक्रमादित्यः—अहो ! आप्यायिताः स्म अनेन गीतामृतेन, अपूर्वः कोऽपि भावस्वरयोर् मधुरिमाऽत्र ।

क्षपणकः—गुणग्राहिता इयं देवस्य रजः कणम् अपि पर्वतपदम् आरोपयन्ती ।

(उपविशति)

वेतालः—यमककविः घटकर्परः क्वाऽऽस्ते ?

(घटकर्परः सविनयम् उत्तिष्ठति ।)

घटकर्परः—देव ! घटकर्परे कुतो रसः । तथापि पद्यद्वयं पठामि—

आलम्ब्य वाऽम्बुतृषितः करकोशपेयं भावानुरक्तवनितासुरतैश्शपेयम् ।
जीयेय येन कविना यमकैः परेण तस्मै वहेयमुदकं घटकर्परेण ॥

हंसा नदन्मेघभयाद् द्रवन्ति निशामुखान्यद्य न चन्द्रवन्ति ।
नवाम्बुमत्ताः शिखिनो नदन्ति मेघागमे कुन्दसमा नदन्ति ॥

('साधु भोः साधु' इति शब्देन सह करतलध्वनिः)

सभाऽध्यक्षः—एष एव कवीनां विशेषः, ते सिकताया अपि रसं स्रावयितुं प्रभवन्ति ।

सिंहगुप्तः—घटस्य कर्पर इति ततो छिन्ना बिन्दवः पतेयुर् एव । तत एव स वनितासुरतैः शपति ।

(सर्वतः हासध्वनिः । घटकर्पर उपविशति)

राजा—आचार्यशङ्कोः मुखात् तु न श्रुतं किमपि ।

शङ्कुः—(उत्थाय) महाराज, आचार्याणां कर्म तु वविकृतिषु शल्यक्रिया । कुतस्तेषां कवित्वम् ? तथापि पठामि एकं पद्यम् ।

दुर्वाराः स्मरमार्गणाः प्रियतमो दूरे मनोऽत्युत्सुक
गाढं प्रेम, नवं वयोऽतिकठिनाः प्राणाः, कुलं निर्मलम् ।
स्त्रीत्वं धैर्य-विरोधि, मन्मथ-सुहृत् कालः, कृतान्तोऽक्षमः,
नो सख्यश्चतुराः कथं नु विरहस्सोढव्य इत्थं शठः ॥

मातृगुप्त.—भोः ! किम् अयं पूर्वजन्मन उदन्तः ?

(सर्वतोऽट्टहासः, शङ्कुः सस्मितम् उपविशति)

सदसस्पतिः—अधुना पण्डित-प्रवरस्य वररुचेर्वारः ।

वररुचिः—(उत्थाय) यथा आदिश्यते भावमिश्रैः । श्रूयतां श्लोकः—

द्रव्यं त्वे तनुरायताक्षि ! दयिता रूपादयस्ते गुणाः
सामान्यं तव यौवनं युवजनस्संस्तौति कर्माणि ते ।
त्वय्यार्ये समवायमिच्छति जनो यस्माद् विशेषोऽस्ति ते
योगस्ते तरुणैर्मनोऽभिलषितैर्मोक्षोऽप्यनिष्टाज्जनात् ॥

वेतालभट्टः—साधु भोः पण्डितप्रवर ! साधु, परम् इदं दर्शनं काव्ये काव्यं वा दर्शने ।

वररुचिः—(स्मयमानः) यथा भवान् मन्यते । (सर्वतः अट्टहासः । वररुचिरुपविशति) ।

विक्रमादित्यः—अहो, निरतिशय आनन्दः अद्य अनुभूतः । तद् उच्यतां यदि कस्यचित् किमपि समीहितम् ।

क्षपणकः—देव ! अस्ति मम एका अभ्यर्थना ।

विक्रमादित्यः—उच्यतां निश्शङ्कम् ।

क्षपणकः—महाराजाधिराज ! मिहिरकुलदन्तक्रकचात् मोचिताः काश्मीरका जनाः । अधुना राजविहीनाः सन्तः नूनं दस्युभिः बाध्यन्ते । तत् शासकः कोऽपि तत्र नियुज्यताम् ।

विक्रमादित्यः—(किञ्चिद् विचिन्त्य) मातृगुप्त !

मातृगुप्तः—(उत्थाय) देव ! को नियोगः ?

विक्रमादित्यः—परीक्षितो भवान् बहुशः । दर्शितं च भवता सर्वत्र निजं पाटवम्, अर्जिता नः विस्रम्भभाजनता । अतस्त्वां गुरुतरे एकस्मिन् कर्मणि नियोजयितुम् इच्छामि ।

(सर्वे कौतूहलेन विक्रमादित्यमुखे दत्तदृष्टयः)

मातृगुप्तः—आदिशतु देवः ।

विक्रमादित्यः—कृतवेदिताम् परदुःखकातरतां कार्यक्षमतां प्रत्युत्पन्नमतित्वं च वीक्ष्य नियुञ्जे त्वां सम्प्रति अनाथानां काश्मीरकप्रजानां पालने । तद् अद्यैव प्रतिष्ठस्व । अथवा आचार्यो वराहमिहिरो वदतु समुचितं दिनम् ।

वराहमिहिरः—देव ! शास्त्रकारैर् उक्तं राजा कालस्य कारणम् इति । अतः यदा भवत आदेशः तदैव मुहूर्तः, तदेव शुभं दिनम् ।

मातृगुप्तः—(अश्रुपूर्णे चक्षुषी कृत्वा) अनेन व्याजेन मां पादाब्जसेवातः विमोचयितुम् इच्छति देवः ।

विक्रमादित्यः सखे, अलं वैक्लव्येन । पश्य—

राज्ञां कृत्यं रक्षणं स्व-प्रजानाम्
भृत्यास्तेषां बाहवः कर्मजाते ।
तत्रस्थस्त्वं दत्तचित्तस्तु तासां
रक्षा-योगे मन्नियोगं कुरुष्व ॥

मातृगुप्तः—देव ! नाऽस्ति ममाऽत्र प्रतिवचनम् ।

विक्रमादित्यः—भो उपनीयन्ताम् राजार्हाणि वस्त्राणि अत्रभवतः काश्मीरेश्वरस्य ।

(एकः सेवकः राजोचितं वस्त्रयुगलं शेखरं च आनीय अर्पयति । वेतालभट्टः नाट्येन परिधापयति ।)

विक्रमादित्यः—(मातृगुप्तस्य करयोः खड्गम् अर्पयित्वा) अधुना अयं निस्त्रिंशः लेखन्यास्तव सहचरो भवतु ।

(सर्वतः 'विजयतां सम्राट् विक्रमादित्यः, विजयतां काश्मीरेश्वरः' इति सकरतलध्वनि घोषः ।)

बन्दी—सङ्गतं श्रीसरस्वत्योरेकसंश्रयदुर्लभम् ।
सति काश्मीरनाथेऽस्मिन् लोकक्षेमाय कल्पताम् ॥

विक्रमादित्यः—अस्मिन् वैदेशिकसङ्कटे देशभक्तिं प्रदर्शितवन्तः नागसेन-सूचक-प्रभृतयः सर्वेऽपि राजकर्मचारिणः पदोन्नत्या पुरस्क्रियन्ते ।

(सर्वतः करतालिकाध्वनिः)

वेतालभट्टः—सप्ताहेन अयं देवादेशः प्रयोगमेष्यति ।

विक्रमादित्यः—कविवर ! क्षपणक ! तुष्टः असि इदानीम् ?

क्षपणकः—देव ! अर्थिकल्पतरो ! साक्षाच्छारदाया विलासः शारदादेशस्य रक्षणे नियुक्त इति एवं संविधातरि भवति कथं न तोषः भविष्यति ?

विक्रमादित्यः—वेताल ! अपि शिष्यते किमपि अन्यत् करणीयम् ?

वेतालः—देव ! किम् अन्यत् करणीयम् ?

हूणा नाशमिता, जनाश्च समिताः काश्मीरका निर्भयं
विद्यानीतिगुणान्वितोऽथ विहितोऽयं मातृगुप्तो नृपः ।
रत्नत्वं गमिता बुधाः परिषदः सम्मानिता, मालवाः
सद्राजाप्तिसमृद्धयोऽथ भजते स्वाधीनतां भारतम् ॥

विक्रमादित्यः—स्वाधीनं भारतं तिष्ठेत्, समृद्धाः ससुखाः प्रजाः ।
विद्याः कलाः समृद्ध्यन्तां विद्वांसः स्युः प्रतिष्ठिताः ॥
जयतु महाकालः, जयतु भारतम् ।

(सर्वतः जय जय ध्वनिः)

(नेपथ्ये गीतम्)

जय जय भारत हे ।
कोटिकोटिजनकण्ठसुभृत-रव—
नित्यगीत-गौरव ! पुण्यस्तव !
जन्मभूमिवत्सल-रिपु-भैरव—
भट-गण-पालित हे !
जय जय भारत हे !

(संगीत-समाप्त्या सह जवनिका-पातः)

समाप्तम्

लेखकस्याऽन्याः कृतयः

१. भारत-सन्देशः (काव्यम्), उत्तर-प्रदेश-शासनेन पुरस्कृतः

२. महावीरचरितम् (शतकम्)

३. संस्कृत-निबन्ध-रत्नाकरः

४. कालिदास-दर्शन (हिन्दी), उत्तर प्रदेश सरकार द्वारा पुरस्कृत

५. कालिदास-दर्पण (हिन्दी) (प्रेस में)